Bhairo Pathak

Shiva rahasya : Sadashivakhyan

Pt 9

शिव रहस्य : सदाशिवाख्यान - नवमांश

Sanskrit

Handwritten on paper & printed

137 years old

64 Folio

13.9"X7.3"

Complete

शिवरहस्ये - तृतीयांशे पूर्व भाग ॥

३ (A)

॥अथशिवरहस्यनवमांसप्रारम्भः॥ श्रीशिवायनमः॥

शिवरहस्यन०९ श्रीगणेशायनमः॥ अथशिवरहस्यनवमांशप्रारंभः सोमात्मजंसामजवक्त्रमाद्यं गणेशसामस्तुतविघ्नवैद्यं आद्यंसुराणांनिखिलैश्चवंद्यं
अ०१ वंदेहृद्यतमंत्वभेद्यं १ श्रीसूतउवाच प्रणम्यतारकारातिंपुराराति तनूभवं विनयावनतोभूत्वाजैगीषव्यःसशांभवः २ शृण्वत्सुदेवसंघेषु
गणेष्वपिमुनिष्वपि हरपादांबुजध्यानानंदनिर्वृत्तमानसः ३ उवाचमोचामधुरवाचाशीतलयामुनिः जैगीषव्यउवाच तारकारेसंहृता
१ रेपुरारेप्रेममंदिर किंचिद्विज्ञप्तुमिच्छामिचित्तेनतदुपधार्यतां ४ अष्टमांशावसानेत्रत्वयैवकथिशांकरे शेषाशेषमुखप्रोक्तंशंभोर्नामसहस्र
कं ५ तदेभिःश्रोतुमिच्छामियद्यस्तिमयितेदया तद्वदाद्यविशेषेणशेषप्रोक्तंसनातनं ६ रसालसारंपीत्वैवनान्यदिच्छतिकोकिलः तद्वच्छि
वकथासारंपीत्वानान्यदिहेच्छति ७ मन्मनःसद्मसंलग्नपादपद्मंमहेशितुः नान्यद्वर्णाश्रमाचारकथाभिरमतेमनः ८ यथाशिवकथासिं
धुपथ्यासंतरणंभवे नतथासर्वधर्मार्थाश्रवणेमेद्यतामतिः ९ तुच्छान्नपृच्छेत्यधर्मादीन्स्वच्छोस्मित्वत्कृपावशात् सूतउवाच इतितद्वचनं
श्रुत्वासानंदजललोचनः स्वनेत्रालोकनेनाशुसीचकारसशांभवं १० स्कंदोभ्युवाचतंशांगंभस्मांगंलिंगपूजकं अनंगमातंगहरंपादप
द्मांतरंगकं ११ श्रीस्कंदउवाच साधुपृष्टंत्वयाशैवशिवपादार्चनेरतं शंभोर्नामसहस्रंतेशेषाशेषमुखोद्गतं १२ पातालेहाटकेशार्चाकारणं
तारणंनृणां शृणुत्वंगणवृंदैश्चवृंदारैश्चमुनीश्वरैः १३ तेनधन्योसिमान्योसिमहामन्युप्रसादभाक् यथाशिवकथासिंधुतरंगानंदशीकरः १४
संसारतापसंतप्तंशीतयत्यंतरेवहि नतथास्वर्धुनीधन्याकिंपावयतितन्नरं १५ गंगालिंगैकसंगापिपापभंगायसानृणुनमुक्तिकांतासंगाय
शांगायैवेहकेवलं १६ भवंतिभवपादाब्जस्मरणेनविभूतयः मतयःसुप्रसन्नास्युःप्रसन्नेपरमेश्वरे १७ सन्नानिसर्वपापानिभिन्नापायो
भवेत्सहि यःसदाध्यायतिहृदामुदैवपरमेश्वरं १८ यदाकदासदैवापिसनदामुक्तिभाक्भवेत् यच्चित्तंविहरेत्साधुसदाशिवपदांबुजे १९
तदेवचित्तंशैवेंद्रअन्यच्चितविकारकं वित्ताशयाभ्रमंत्यज्ञाःहृत्तापकरणंहितत् २० मुधासुधाविहायांधाःपतंतिविषयावटे देवोरुतटिनी
जूटंकररटित्वक्कृतांवरं २१ विहायपार्वतीकांतंहालासुधापरिमोहिताः कृतांतसदनेतांताःशांताअपिकलौद्विजः २२ नतथात्वंमहाबुसे
सिध्येःपात्रंत्वमेवहि त्रिनेत्रसुचरित्राणांद्विनाणांश्रावकोपियः २३ श्रोत्रनेत्रमहाहारपादपंकजसेविनां ऐहिकामुष्मिकीसिद्धिःयुष्म

रामः
१

त्सुमुनिसत्तमाः २४ हृत्तमोनाशकं ज्ञानंमुक्ताएवभविष्यथ कालांतकंसच्छत्पूज्यकालातीतोभविष्यति २५ नकालसदनंयातिमदनांतकपूजया
जयापिहिभवेत्सद्योविभवोपिहिशाश्वतः २६ भवभावप्रपन्नानांभावानांभवनाशनं जायतेनात्रसंदेहोभवोद्भवपदार्चनात् २७ भवानीरमणार्चायां
योनिष्टस्तुष्टएवसः अपीयोपिसहिज्यायान्नहिजोपिद्विजाहूरः २८ द्विजराजकलामौलिपादपंकजसेवया द्विजानामभवसर्वेषांश्रेयःसावित्रि
लोचनः २९ उमासहायोविश्वेशोजगद्दुःखापहारकः तारकःसर्वजंतूनांसर्वेषामेवशंकरः ३० किंकरास्तस्यसर्वेपिअसुराभूसुराःसुराः पूजनीयः
सदालिंगेबिल्वपत्रैश्चकोमलैः ३१ द्वित्रैर्वापिपवित्रैर्वात्रिनेत्रोमोचकःसदा भस्माभ्यक्तस्त्रिपुंड्रांकोरुद्राक्षामलहारकः ३२ यस्तुसंपूजयेल्लिंगेतु
गेशांगेमहामनाः अलिंगोपिमहादेवस्ततापभंगयत्यपि ३३ तुंगंवाप्यंतरंगंवातमसंगंकरोतिशिवः स्कंदउवाच यःकोपिशंगोभुविभस्मसंगोलिं
गोत्तमांगेविमलंसतुंगं विल्वंतथार्कंकरवीरपुष्पंगंगांभसाज्ञामददातिभाग्यैः ३४ सएवमातंगहरांगसंगमोक्षैकसंगायभवेदसंगः येखंडविल्वी
दलमिंदुमौलेःश्रीखंडलिप्तेशिरसिक्षिपंति आखंडलाद्यैरभिवंदनीयास्तेखंडचंद्रंशिरसावहंति ३५ इतिश्रीशिवरहस्येसदाशिवाख्येनवमां
शेजैगीषव्यश्रीस्कंदसंवादेप्रथमोध्यायः ॥१॥ श्रीस्कंदउवाच शेषाशेषमुखोद्गीतानामसारावलीमिमां हाटकेशोरुकटकभूतेनादीनकेनतु २
सहस्रनामयत्प्रोक्तंतत्तेवक्ष्याम्यहंशृणु धन्यंमान्यंमहामन्युप्रीतिदायकमुत्तमं ३ नाल्पेषुदापनीयंतेनदेयंवेदमीदृशं पंचास्यहृदयाशास्यमनुशा
सामितेहृदि ४ ऋषिरस्यादिशेषोवैदेवदेवमहेश्वरः सर्वत्रविनयोगोस्यकर्मस्वपिसदाद्विज ५ ध्यानंतस्यानुवक्ष्यामित्वमेकाग्रमनाःशृणुः स्कंदउवाच
ध्यायेदिंदुकलाधरंगिरिधनुंसोमाग्निफालोज्वलंवैकुंठेरुविपाठवाणसुकरंदेवंरथेधिष्ठितं वेदाश्वंविधिसारथिंगिरिजयाचिंतेतुसंदग्रहे नानाकाम
कलाविलासजगदानंदादिसंपूर्तये १ एवंध्यात्वामहादेवंनाम्नांसाहस्रमुत्तमं प्रजपेन्नियतोमंत्रीभस्मरुद्राक्षभूषणः १ लिंगमभ्यर्च्यपत्रापिबिल्व
कोमलपल्लवैः पंकजेरुत्पलैर्वापिप्रसादायमहेशितुः २ अष्टम्यांवाचतुर्दश्यांपर्वस्वपिविशेषतः यंयंकामंसदाचित्तेभावयेत्तत्तदाप्नुयात् ३॥
ॐगंगाधरोंधकरिपुःपिनाकीप्रमथाधिपः भवईशानआतायीनेकधन्वामहेश्वरः १ महादेवःपशुपतिःस्थाणुःसर्वज्ञईश्वरःविश्वाधिकःशिवः
शांतोविश्वात्मागगनांतरः २ परावरोविकानाथःशरदिंदुकलाधरः गणेशतातोदेवेशोभववैद्यःपितामहः ३ तरणस्तारकस्तास्त्रोप्रपंचरहितोहरः

शिवरहस्यन० अ०२ २

विनायकस्तुतपदोस्मारथोनंदिवाहनः ४ गजांतकोधनुर्धारीवीरघोषस्तुतिप्रियः प्रजासंहरणोचंडतांडवोमन्मथांतकः ५ शिपिविष्टः शाश्वता
त्मामेघवाहोदुरासदः आनंदपूर्णोवर्षात्मारुद्रः संहारकारकः ६ भगनेत्रप्रमथनोनिस्सजेत्तापराजितः महाकारुणिकः शुभ्रः प्रसन्नास्योमखांतकः ७
घनाभकंठोगरभुक्वस्तुशेणवीर्यवर्धनः प्रकटस्तवनोमानीमनस्वीज्ञानदायकः ८ कंदर्पदर्पसद्योविषादीनीललोहितः कालांतकोयुगावर्त्तः
संक्रंदनसुनंदनः ९ दीनपोषोपाशहंताशांतात्माक्रोधवर्धनः कंदर्पविलसच्चंद्रोलिंगाध्यक्षोगजांतकः १० वैकुंठपूज्योविश्वात्मात्रिनेत्रोवृषभध्व
जः जन्हुजापतिरीशानःश्मशाननिलयोयुवा ११ पार्वतीजानिरुद्वास्योनानात्मविद्यापरायणः सामवेदप्रियोवैद्याविद्याधिपतिरीश्वरः १२ कुमारजनको
मारमारकोवीरसत्तमः कंबलाश्वतरोद्धारिसुफणोत्कृष्टकुंडलः १३ आनंदवनवासोथअविमुक्तमहेश्वरः ॐकारनिलयोधन्वीकेदारेशोमितप्रभः १४
नर्मदालिंगनिलयोनिष्पापजनवत्सलः महाकैलासलिंगात्मावीरभद्रप्रसादकृत् १५ कालाग्निरुद्रोनंतात्माभस्मांगोगोपतिप्रियः वेदाश्वः कंजजाज्ञा
निनेत्रपूजितपादुकः १६ जलंधरवधोद्युक्तदिव्यचक्रप्रदायकः वामनोविकटोमुंडः सुहुंडः कृतसंस्तुतिः १७ फणीश्वरमहाहारोरुद्राक्षकृतकंकणः
वीणापाणिर्गानरतोढक्कावाद्यप्रियोवशी १८ विशालवक्षाः शैलेंद्रजामातामरसत्तमः हृत्तमोनाशकोवृत्तोजगत्कंदोदीनोवली १९ पलाशपु
ष्पपूज्यांघ्रिः पलाशनवरप्रदः सागरांतर्गतोघोरः सद्योजातोविकासखः २० वामदेवः सामगीतः सोमसोमकलाधरः निःसीममहिमोदारः दूरिता
खिलपातकः २१ तपनांतर्गतोधाताधेनुपुत्रवरप्रदः बाणहस्तप्रदोनेतानमुचिवीर्यवर्धनः २२ नागाजिनांगोनागेशोनागेश्वरकंकणः
अगेशशायीभूतेशोगणकोलाहलप्रियः २३ प्रसन्नास्योनेकबाहुःस्थूलधृक्कालतापन कालप्रमथनः कूर्ममहाखर्परधारकः २४ नारसिंहाजि
नधरोमहालांगलधृक्कलिः ककुद्रोन्मथनोहेतुरहेतुःसर्वकारणः कृशानुरेतसोत्फुल्लफालनेत्रोमरीरिहा मृगबालधरोधन्वीशक्रबाहुविभं
जकः २६ दक्षयज्ञप्रमथनः प्रमथाधिपतिः शिवः शतावर्तोयुगावर्तोमेघावर्तोदुरासदः २७ मनोजवोजातजनोवेदाधारःसनातनः पांडुरा
गोगोजिनांगःकर्मीद्विजनवत्सलः २८ चातुर्होत्रोवीरहोताशनरुद्रियमध्वगः भीमोरुद्रउदावर्त्तोविषमाक्षोरुणेश्वरः २९ यक्षराजनुतोनाथोनीतिशास्त्रप्रवर्तकः
कपालपाणिर्भगवान्वैयाघ्रत्वगलंकृतः ३० मोक्षसारोध्वराध्यक्षःध्वजनीवोमरुत्सखा अरुणोथस्तगाध्यक्षोकामनारहितस्तरुः ३१ विल्वपूज्योविल्विनोशोह रामः

रिट्श्चापराजितः वृहद्रथंतरस्तुत्योवामदेवःस्तवप्रियः ३२ अघोरतनुरेजिष्ठोगंभीरोमन्युरीश्वरः कलिप्रवर्त्तकोयोगीसांख्यामायाविशारदः ३३ विधार
णोधैर्यधुर्योसोमधामांतरस्थितः शिपिविष्टोगव्हरेष्टोजेष्टोदेवः कनिष्ठकः ३४ पिनाकहस्तोवरजोदुंदुभ्योवर्म्मिरेष्यकः कवचीचनिषंगीवरथधोषो
मितप्रभः कालंजरोदंदशूकः विदर्भेशोगुणातिगः गभस्तीशोमुनिश्रेष्ठोमहर्षिः संशितव्रतः ३ कर्णिकारवनावासिकरवीरसुमप्रियः नीलोत्पलम
हास्रग्वीकरहट्टपुरेश्वरः ३७ शतचंनः परानंदोब्राह्मणार्च्योपवीतवान् वलीवालप्रियोधर्मोहिरण्यपतिरप्पतिः ३८ यमप्रमथनोष्णीषीचक्रहस्तःपु
रंतकः वसुषेणांगनादेहः कौलाचारप्रवर्तकः ३९ तंत्राध्यक्षोमंत्रमयोगायत्रीमध्यगः शुचिः वेदात्मायज्ञसंप्रीतोगरिष्टोपारदःकलिः ४० ऋग्यजुः
सामरूपात्मासर्वात्माऋतुरीश्वरः हिरण्यगर्भजनकोहिरण्याक्षवरप्रदः ४१ दमिताशेषपाषंडोदंडहस्तोदुरासदः दूर्वार्चनप्रियकरोरंतिदेवोमरेश्वरः
अमृतात्मामहादेवोहरःसंसारकारकः त्रिगुणोविषनावाग्मीलंङ्कासरुधिरासनः ४३ वपाप्रियोवसानिष्ठोविष्णुरक्तप्रियोगुरुः किरातवेषःशोणात्मार
त्नगर्भोरुणेक्षणः ४४ सुरासववलिप्रीतस्तत्पूर्षोगंधदेहवान् व्योमकेशःकोशहीनःकल्पनारहितःक्षमी ४५ सहमानश्चविव्याधीस्फटिकोपलनिर्मे
लः मृत्युंजयोदुराराध्योभक्तिप्रीतोभयापहः ४६ गंधर्वगानसुप्रीतोविष्णुगर्भोमितद्युतिः ब्रह्मस्तुतःसूर्यनेत्रोवीतिहोत्रोर्जुनोगकः ४७ गर्वापहारकोवा
ग्मीकुंभसंभवपूजितः मलयोविंध्यनिलयोमहेंद्रोमेरुनायकः ४८ पार्वतीनायकोजप्योजंगमाजंगमाश्रयः कुरुविंदोरुणोतन्वीअस्थिभूषोनिशा
करः ४९ समुद्रमथनोद्भूतकालकूटविषादनः सुरासुरेंद्रवरदोदयामूर्तिःसहस्रपात् ५० कारणोवीरणःपुत्रीजंतुगर्भोगरादनः श्रीशैलमूलनिलयः
श्रीमदभ्रसभापतिः ५१ दक्षिणामूर्तिरनघोजलंधरनिपातनः दक्षिण्योयजमानात्मादीक्षितोदैत्यनाशकः ५२ कल्माषपादपूज्यांघ्रिरतिदातुरगप्रियः
उमाधवोदीनदयोदातादीनोदयापरः ५३ श्रीमद्दक्षिणकैलासनिवासोजनवत्सलः दर्भरोमावलोन्नेतातामसस्तनुवर्धनः ५४ नमस्कारप्रियोनाथो
आनंदात्मासनातनः तमालनीलसुगतोकुतर्कविनिवारकः ५५ कार्यरूपःप्रशांतात्माकरणानांचकारणः तृणपाणिः कांतिपरोमणिःपाणिकु
लाचलः ५६ कस्तूरीतिलकक्रांतफालोभस्मत्रिपुंड्रवान् वारणांगालंकृतांगोमहापापनिवारणः ५७ प्रकाशरूपोगुह्यात्मावालरूपेविलेशयः
भिक्षुप्रियोभक्ष्यभोक्तामरद्वाजप्रियोवशी ५८ कर्मण्योनरकोध्वंसीतरुणोयानहर्षदः वृषगामीधर्मगोप्ताकामीकामांगनाशनः ५९ कारुण्योवा

जरूपात्मा निधर्मी ग्रामणीः प्रभुः अरण्यपशुहस्तश्च सैनिको मेघवाहनः ६० कुमारगुरुरानंदो वामनो वाग्भवो युवा स्वर्धुनीधन्यमौलिश्च तरुराजो महा
मनाः ६१ कणाशनस्ताम्रघनो मयप्रीतो जरामरः गाणगारिः फालनेत्रो वर्णाश्रमपरायणः ६२ पुराणवृंदसंप्रीतो इतिहासविशारदः समर्थो नमिताशे
षदेवो द्योतकरः फणी ६३ कर्षको लांगलेशश्च मेरुधन्वा प्रजापतिः उग्रः पशुपतिर्गोप्ता पवमानो विभावसुः ६४ उदावसुर्वीनरो गोउर्वीशो वीर्यवर्द्धनः
ज्वालमालो जितांगश्च वैद्युदग्निप्रवर्त्तकः ६५ कमनीयाकृतिः पानाआषाढो षंडवर्जितः पुलिंदरूपः पुण्यात्मा पुण्यपापफलप्रदः ६६ गार्हपत्यो दक्षिणा
ग्निः सभ्यो वसथ्यहव्यकविः द्रुमआहवनीयश्च तस्करो थमयस्करः ६७ शंकरो वारिदो वायो वातचक्रप्रवर्तकः कुलिशायुधहस्तश्च विकृतो जटिलः शिखी ६८
सौराष्ट्रवासी देवेज्यो सह्यजाती रसंस्थितः महाकायो वीतभयो गणगीतो विशारदः ६९ तपस्वी तापसाचार्यः द्रुमहस्तोज्वलप्रभुः किंदमो मंकणप्रीतो जातुकर्णे
स्तुतिप्रियः ७० वेनो वैन्यो विशाखश्च कंपनो रोमधारकः उपायदो दारितांगो नानागमविशारदः ७१ काव्यालापैककुशलो मीमांसावल्लभो ध्रुवः तालमूल
निकेतश्च विल्वमूलप्रपूजितः ७२ वेदांगो गमनो गम्यो गम्यप्रीतः फलादनः गंगातीरस्थितो लिंगी अलिंगो रूपसंश्रयः ७३ श्रांतिहा पण्यनिलयः पललाशी
कंपूजितः महेंद्रविसृजनको ब्रह्मतातो स्तुतो व्ययः ७४ कर्दमेशो मतंगेशो विश्वेशो गंधधारकः विशालो विमलो जिष्णुजयशीलो जयप्रदः ७५ दारिद्र्यमथ
नो मंत्री शंभुः शशिकलाधरः शिंशुमारे शौनकेड्यो श्वानयोश्चितजीवदः ७६ मुनिबालप्रियो गोत्रो भिलिंदो मंत्रसंस्थितः काशीशोकामितांगश्च वल्लकीवा
दनप्रियः ७७ हल्लीसल्लास्यनिपुणो सल्लीलो वल्लरीप्रियः महापारदसद्वीर्यो वन्हिनेत्रो जयधरः ७८ आलाद्यो नेकरूपात्मा पुरुषः प्रकृतिः परः स्थाणुर्वेणु
वनप्रीतो रणजित्पाकशासनः ७९ नग्नो निराकृतो धूम्रो वैद्युतो विश्वनायकः विश्वाधिकः शांतरवः शाश्वतः सुमुखो महान् ८० अणोरणः श्वभ्रगतो अवटे
शोनटेश्वरः चित्रधामचित्रभानुः विचित्राकृतिरीश्वरः ८१ इंद्रो जो मूर्तिरूपात्मा अमूर्तो वन्हिधारकः अपस्मारहरो गुप्तो योगिध्येयो विलादनः ८२ नक्षत्ररूपः
क्षत्रात्मा सुतृष्णाश्रमवर्जितः असंगो भूतहृदयः वालखिल्यो मरीचिपः ८३ पंचप्रेतासनासीनो योगिनीगणसेवितः नानाभाषानुचरितो नानादेशसमाश्रयः ८४
वृंदारकगणस्तुत्यः पुरंदरनतिप्रियः प्रघसा विघसाशी च अन्नाधिपतिरल्लगः ८५ पन्नगाभरणो योगी गुरुर्लीकेकनायकः विराजो तिश्वतो धर्मी वभ्रुशो
वाल्कप्रियः ८६ प्रदाननिपुणो मित्रो ऊर्ध्वरेता महातपाः कुरुजांगलवासी च नित्यतृप्तो निरंजनः ८७ हिरण्यगर्भो भूतादिरखरा द्रसम्राड्विराट्पटुः पटहध्व

निसंप्रीतोननमुक्तिप्रदायकः ८८ फलप्रदःफालनेत्रःफणीश्वरमहांगधृक् वास्तुपोवासवोवात्मावर्मभिद्भुसनोज्वलः ८९ मीढुमःशिवतमोवसुः
शिवतरोवलीनिधनेशोनिधानेशोपुरजिद्राष्ट्रवर्धनः ९० अयुतायुःशतायुश्चप्राप्तायुःशताध्वरः सहस्रशृंगोवृषभोउरुगायोरुमीढुकः ९१ गतागमपि
त्तागातागस्त्मानीतवर्धनः रागरागिणिकाप्रीतोतालपाणिर्गदापहः ९२ देवेशःखंडपरशुःप्रचंडतरविक्रमः उरुक्रमोमहाबाहुर्हेतिश्चक्रावकादनः गणि
कानाट्यनिरतोविमर्शीवावदूककः कलिप्रमथनोधीरोधीरोदात्तोमहाहनु ९४ क्षयद्वीरोमुंजिकेशोकल्मलीकिःसुरोत्तमः वज्रांगोवायुजनकोअष्टमूर्तिःकृ
पाकरः ९५ प्रहूतःपरमोदारःपंचाक्षरपरायणः कर्कंधुःकामदहनोनलिनाक्षोजडाजडः ९६ कुवेरपूजितपदामहानक्षककंकणः शंखणोमधुरारावो
मृडस्स्सिंजरोजरः ९७ मार्गोमार्गप्रदोमुक्तोविजितारिःपरोवरः प्रणवार्थोवेदमयोवेदांतांवुजभास्करः ९८ सर्वविद्याधिपःसोम्योयज्ञेशोक्षेत्रनायकः पाप
नाशकरोदिव्योगोभिल्लोगोपरोगणः ९९ गणेशपूजितपदोललितांवामनोहरः कक्षवासोमहोक्षांकोनिस्तमःस्तोमवर्जितः १०० निःसीममहिमोदारःप्र
भामूर्त्तिःप्रसन्नवाक् स्तोभप्रीतोभारभूतोभूभारहरणंस्थिरः क्षराक्षरोक्षरोत्यर्त्तोसागरांतर्गतोवशी रेष्म्यारस्योरजस्योथप्रवाह्योविद्युतोनलः २ सिंकत्योवाद्य
उर्वर्योमेध्योद्भिय्यवाक्पटुः प्रपंचमायारहितोकीर्तितोवीर्यवर्धनः ३ कालचक्रांतरहितोनित्यानित्यार्थचेतनः गर्वोन्ननोभयकारोमृगयुर्भवहाभवः
४ शृंगःशतांगःशीतांगोनागांगोभस्मभूषणः त्रियंवकोंविकाभर्त्तानंदिकेशप्रसादकृत् चंडीशवरदोदिव्योमायाविद्याविशारदः मृगांगशेखरोभव्यागो
रीपूज्योदयामयः ६ प्रमाथनोकिंकथनोगर्गोवीणाप्रियोवटुः वर्णीवनस्थोयतिराड्गूढगर्भोविरोचनः ७ शंवरोवर्वरोधौम्योविराट्रूपःस्थितिप्रदःम
हाकारुणिकोभ्रांतिनाशकःशोकहाप्रभुः ८ अशोकपुष्पपूज्योंघ्रिर्मणिभद्रोमहेश्वरः अमृतेशोद्भुतगतिस्तगरोर्जुनमध्यगः ९ दमोविरोधहृत्कांतो
नीतिज्ञोविष्णुपूजितः सुमप्रियोवातमयोवरीयान्कर्मठोयमी ११० दिगंवरोशममयोधूमपःशुक्रगर्भकः अट्टहासोतलशयोआसीनोधावमानकः ११
तुराषाड्मेघमध्यस्थोविपाशातीरसंस्थितः कुलोन्ननोकुलीनश्चव्यवहारप्रवर्त्तकः १२ केतुमालोहरिद्रांगोद्रापिःपुष्पमयोभृगुः विशेषकोर्वीनिर
तःत्वग्जातोरुधिरप्रियः १३ अर्केनवहृदावासीक्षपानाथकुलाधरः नक्तंचरोदिवाचारीदिव्यदेहोविशासकः १४ कदंववनमध्यस्थोहरिद्रांगोमिमध्य
गः यमुनाजलमध्यस्थोजालकोजामरोवसुः १५ वसुप्रदोवीरवर्यःशूलहस्तप्रतापवान् खड्गहस्तोमंगलात्मामृत्युर्मृत्युजिदीश्वरः लंकावासोमेघ

मालोगंधमादनसंस्थितः भैरवोभरणेभर्ताभ्रात्तव्योनामरूपकः १७ अव्याकृतात्माभूतात्मापंचभूतांतरोस्मयः अहनन्योशब्दमयःकालाधारक
लाधरः १८ भृगुतुंगोचीरवासीकेवर्त्तोनायकोर्धकः करेणुपोगंधमदःचांपेयकुसुमप्रियः १९ भद्दोचर्मवसनोवैराजस्तोत्रकारकः सुमप्रीतःसाम
गीतीऊर्जोवर्चाःकुलेश्वरः ककुद्मान्श्रीनवसनोवघ्रेशोनारदःपिता कृष्णादनोनीतिमयोधर्मचक्रप्रवर्त्तकः २१ शष्पःफेनोविनिर्नेताकंकणोनाशिको
शलः एणांकःशलभाकारोशाल्लूरोग्रामसंस्थितः २२ महाविशेषकथनोवारीतीरस्थितःसलः कृपीडयोनिशांतात्मागुणवान्ज्ञानवांछुचिः २३
सर्वपापहरोलिंगोभगमालोप्रतारणः आनंदघनआतार्योईरिण्योथप्रपथ्यकः २४ गंगातीरस्थितोदेवः अविमुक्तसमाश्रयः महास्मशाननिल
योवलयोवालिपूजितः २५ करंधमोत्रासवर्योमानवोजीवकेशवः कर्मदेवमयोब्रह्मकृत्तंसत्यंमहेश्वरः २६ सुमंगलःसुखमयोज्ञानानंदोमित्र
शनः मनोमयःप्राणमयोविज्ञानात्माप्रसादनः २७ आनंदमयकोशात्माधामासीमाथभूमकः सदाशिवोविशिष्टात्मावशिष्टार्चितपादुकः २८
नीलग्रीवःसैन्यपालोदिशानाथोनतिप्रियः केशवोन्मथनोमोनीमधुसूदनसूदनः २९ उदुंबरकरोडिंभःवंभरोपिंछलस्तलः मूलस्तालकरो
वर्णोपर्णोदप्राणनाशकः १३० अपर्णापतिराशास्योसंपूर्णःपूर्णरूपवान् दीपमालोजांगलिकोवेतुडस्तुंडकप्रियः ३१ उत्लूकःकलविंकोथशु
कनाथप्रसादकृत् जैगीषव्यतपःप्रीतोरावणेज्योवलार्दनः ३२ मार्कंडेयमहामृत्युनाशकोज्ञानवारकः अहर्गणक्रियातीतःसर्पप्रीतोनिला
शनः ३३ वेगाधारोधैर्यघनोधनधान्यप्रदायकः नाद्योवैद्योवाद्यरतोगद्यपद्यस्तुतोद्यकः ३४ भेरीभांकारनिरतोमृगचर्मविधारकः पुण्यकी
र्तिःपुण्यलभ्योमोहनास्त्रविशारदः कैलासशिखरावासःपारिजातवनाश्रयः इलांदरवसंप्रीतोमहेंद्रस्तुतिहर्षितः ३६ यूवावयोभारवकः
कोमलांगोजनाश्रयः विश्वामित्रप्रियोवालापाकयज्ञरतःसुखी ३७ वामाचारप्रियोनेताशक्तिहस्तोदुरासदः सर्वाकारःशाश्वतात्मावाङ्मनोदूर
गोहरः ३८ श्रीस्कंदउवाच इत्येतन्नामसाहस्रंशेषाशेषमुखोद्गतं शंभोर्दिव्यंमुनिश्रेष्ठश्रवणात्पापनाशनं ३९ सर्वान्कामानवाप्नोतिशिवार्चनपरायणः
त्वमेभिमुनिमुख्येभ्यश्शृण्वन्भक्तिमवाप्नुयात् १४० कुमारीपतिमाप्नोतिनिर्द्रव्योधनवान्भवेत् जयार्थीजयमाप्नोतिक्षयद्वीरप्रसादतः ४१ श्रीस्कंदउवाच
इतितवगदितंमेनामसहस्रमेतत्स्थिरवरचरणाज्जाराधनेसाधनंतेमुनिगणगणवर्यैःधार्यमेतत्सुराद्यैः परमपदमवाप्तुंशंकराज्ञावशेन १४२ इतिश्री

शिवरहस्ये सदाशिवाख्ये नवमांशे श्रीशिवसहस्रनामकथनंनामद्वितीयोध्यायः २ श्रीसदाशिवउवाच॥ जैगीषव्यउवाच
श्रुतंनेतारकाएतेनामसाहस्रमुत्तमं विशेषतःशेषकृत्तमशेषाघनिवारकं १ प्रश्नमेनंवदाद्यत्वंष्टेक्लंवैकुतूहलात् कृतंत्रेतद्दा
परेषुसर्वधर्मप्रकाशिषु २ युगेष्वपिमहादेवभक्तिर्नैवोपजायते कथंकलियुगेघोरेनष्टधर्मेममतिःशिवे ३ कथंवाकलिजानांतुशि
वभक्तिर्भविष्यति संकराणांजारजानांदुर्बीजानांविशेषतः ४ वर्णाश्रमादिहीनानांअवेदानांशिवात्मज भक्तिःकथंभवेच्छंभोसाक्षा
न्मुक्तिप्रदायिनी ५ यासानंततपोलभ्याअलभ्येवदुरात्मनां यःशिवानुग्रहोतस्यैवतस्यभक्तेःपात्रतामियात् ६ सानधर्मतपोलभ्या
अलभ्यायोगिनामपि नार्वरदानतोलभ्यावदस्तुत्तमदानतः ७ नमोसहस्रदानेर्वानोवाजिवरदानतः नरथायुतदानेर्वाहिरण्या
दिकदानतः नरोप्यकूप्यदानैर्वानावरादिप्रदानतः नतुलापुरुषाद्यैर्वादशधेनुप्रदानतः ९ नसत्राहीनएकाहदक्षदीक्षोपसंघ
कैः साभक्तिःशांभवीजातुभविष्यतिकदाचन १० नान्नतोयप्रदानैर्वाविप्रग्रामप्रदानतः प्रपामंडपविस्तारच्छायावनसुरोपणैः
११ सरसस्तीरवंधैर्वासाभक्तिःशांभवीभवेत् योमहादेवपादाब्जध्यानानंदैकमेदुरः १२ तेनैवलभ्यासाभक्तिःसाक्षान्मोक्षप्रदायिनी
नवर्णाश्रमधर्मैर्वानवाचारानुपालनैः आभिजात्येनशीलेनसानलभ्याकथंचन नवेदांतादिवाक्यैर्वानशब्दैस्तर्ककोटिभिः १४
नमीमांसासहस्रैर्वानमीमांस्याकथंचन प्रसादःशांकरोयस्यतस्यभक्तिर्महेश्वरे १५ यंचिंतयतिगौरीशोमोचयामीतिपाशतः तंभ
क्तिभाग्यधौरेयंकुरुतेकरुणाकरः १६ शरणागतपालायशिवायपरमात्मने योनमस्कुरुतेप्रीत्यासमुक्तोमोचयेत्परान् १७ द्विजो
वाश्वपचोवापिनतस्यसुमहानणुः भावग्राह्योमहादेवोभावदःपरमेश्वरः १८ नतस्यकश्चिन्मित्रोवाशत्रुर्वास्तिकदाचन सर्वेसुरा
सुराविप्राःपशवस्तदृशेस्थिताः १९ सएवंदेवदेवेशःपशुपाशनिकृंततः तस्यमायामयंसर्वंजगदेतच्चराचरं २० यस्याष्टमूर्ति
भिर्व्याप्तंतेनभिन्नंनकिंचन ईशावास्यमितिवेदेनसर्वंशिवमयंजगत् २१ योसौसूर्येस्थितोदेवःसमिंधयतितेजसा योसावग्निस्थितोदेवो
वचसातंप्रपूरयेत् २२ योसौचंद्रेस्थितोदेवःत्यातंसमपूरयत् योसौवायुस्थितोदेवःचलनैरविशेश्चतं २३ योसौविष्णुस्थितोदेवः

न.९
शिवरहस्य
अ.३
५

पालक्याशक्तितोपुनः योसौब्रह्मणिविश्वात्मास्रष्टिकर्त्तात्मनास्थितः २४ योसौरुद्रात्मकोदेवःसकालेसंहरेज्जगत् योसाविंद्रात्मकोदे
वःत्रिविष्टपनिविष्टपः २५ योसौभूमिमयोदेवोधत्तेसर्वंचराचरं योसौसवरुणोदेवोआपःपातित्विषांपतिः २६ योसावाकाशगोदेवः
व्याप्यतिष्ठतिरोदसी योसावापांशरीरोवैनदीनदगणाधिपः २७ योसौसर्वात्मकोदेवःसर्वभूतगुहाशयः पुरुषःपरिपूर्णात्मातेनपूर्णमि
दंजगत् २८ तस्यैवकृपयाभक्तिःजायतेनान्तरेच्छया भक्तिज्ञानंविजायेतसैवभक्तिप्रसादतः २९ स्वतंत्रस्यमहेशस्यनिरिछस्यपिना
किनः भक्तैवलभतेमुक्तिःनान्यथावेदवादतः ३० यस्यैवआत्मावृणुतेइतिमंत्रानुशासनात् परांचिखानिदेवेशोव्यतृणत्परमेश्वरः ३१
तस्माद्ब्रह्मादयोदेवामोहितास्शिवमायया कश्चिद्धीरोमहादेवप्रसादादेवशूलिनः ३२ प्रत्यगात्मानमिछेतशिवमेवसनातनं सर्वभूतेषुसंग
तंलिंगस्थंवापिभक्तितः ३३ तेनैवसुकरोमार्गोदर्शितःशूलपाणिना सर्वेषांभक्तिलाभायमुक्तयेपिचशाश्वतः ३४ अग्निरित्यादिभिर्मंत्रैस्त्रि
कालंभस्मधारणं त्रियायुषेणमंत्रेणत्रिपुंड्रस्यचधारणं ३५ त्र्यंबकेनमंत्रेणरुद्राक्षाणांचधारणंपंचाक्षरेणमंत्रेणत्रिकालंलिंगपूजनं३६
रुद्राध्यायजपश्चैवत्रिकालंसावधानतः विल्वपत्रैर्महादेवपूजनंसोमवासरे कालाष्टम्यांमहादेवंविल्वपत्रैश्चपूजयेत् चतुर्दश्यामपामा
र्गैःनिशिविल्वैश्चपूजनं ३८ अस्तदोषेप्रदोषेचविल्वैर्लिंगस्यपूजनं शिवक्षेत्रनिवासश्चअविमुक्तेविशेषतः ३९ शिवभक्तार्चनंवा
पिभोगभाग्येर्यथारुचिः शिवोत्सवादिदर्शश्चशिवाश्रमनिषेवणं ४० शिवध्यानंमहामूर्तेःसांबस्यचविशेषतः नृत्तमानंत्रयीनेत्रंसां
बंचंद्रकलाधरं ४१ नीलकंठंचसानंदंनंदिभृंगिनिषेवितं गणेशस्कंदजनकंध्यायेद्देवंमहेश्वरं ४२ क्षणार्धंवातदर्धंवासमुक्तोभव
तिध्रुवं एवंभक्तिर्विरूपाक्षेयस्यसाधारणीभवेत् ४३ सनरस्त्येवसंसारमसारंजन्ममृत्युदं साकथंजायतेस्कंदकलिस्थानांविशेषतः
४४ नृणामत्यंतपापानांसंकराणांदुरात्मनां कलेस्वरूपमधुनावदशंकरसंभवं ४५ त्वत्तोनान्योरहस्यज्ञोगुरुर्मेनास्तिकश्चन त
स्मात्वांपरिपृच्छामिइच्छाप्रश्ननिरूपणे ४६ सूतउवाच इतिमुनिवचनंनिशम्यहर्षाद्भवसूनुःकमलछंदाछनेत्रः मुनिमानस
हर्षवर्षधाराएवरकेकारवचांतकेभ्युवाच ४७ इतिश्रीशिवरहस्येश्रीसदाशिवाख्येनवमांशेमुनिवाक्यंनामतृतीयोध्यायः ३ स्कंदउवाच

शिवः
५

पदष्टकेलयानातप्रश्रमेनंमनोहरं सर्वलोकोपकारायकेलासेशंकरालये १ मणिसौधसहस्राढेरत्नप्राकारविस्तृते मणिमंडपसाहस्रेरन्वितेख
चितोपले २ नवरत्नमणिज्योतिप्रभाकीलितदिङ्मुखे वैडूर्यसूत्रानरगकांनिकांचितदिक्तटे ३ हरिद्रूरिमणीगर्भसंछन्नामलभूतले मणिगोपुरगोद्भा
सिकलशद्योतिताबरे ४ चलत्पताकानिवहसंवहोद्भूतवातके सभाविभासिनटनकंपिताखिलभूतले ५ मणिधारामहोदारादूरीकृततमस्तति प्राकार
गोपुरोत्तुंगगोपुंगवविराजिते ६ मणिगर्भेशिवागारसंशोभिसुमनोहरे केलासेश्रमहालिंगत्तुंगधामोपशोभितं ७ पंचगंगातरोद्भासिलिंगपंक्तिविरा
जिते तत्तीरसुमनोहारिरत्नसोपानसंयुते ८ अंबिकेशालयोद्दामकुंभदीधितिदीपिते नंदिकेशादिगणपक्षतत्तूर्यरवैर्युते ९ गणेशस्कंदसदनसानं
दगिरिमस्तके देवीश्वरमहाधामधगत्धगितदिक्तटे १० महागिरिवरोत्तुंगरत्नसौधविराजिते मणिकाखचितोदारतारहीरविराजिते ११ इंद्रनीलम
हाकांतिनीलकालकितांबरे नंदनानंदनशतसुचंदनवनावृते १२ तमालसालविपिनमध्यप्रासादशोभिते हरिन्मणिमहारंभाचलत्पत्रशतावृते १३
रत्नतालीवनोद्दामघर्घराखुलमारुते महासरोवरोद्भासिफुल्लनीरजशोभिते १४ रत्नकल्हारकुमुदशतपत्रविराजिते चंपकाशोककादंबविल्वना
गवनावृते १५ भ्रमत्भ्रमरतत्पुष्पगुच्छाच्छादितमस्तके बिल्वमूलस्थितोत्तुंगलिंगसंगतभूतले १६ प्रवालजालकोद्दामस्तंभमंडपसुंदरे नानापक्षि
युतापारकृतानंदितकंदरे १७ मृगमातंगशरभसारंगमहिषावृते चमरीसमरोद्दंडकोलकुलेश्वशोभिते १८ मयूरस्पुकजाएवपुंस्कोकिलविनादिते
सिंहर्क्षट्टकशार्दूलवनगोखड्गशोभिते १९ गणवक्त्रमहातूर्यदुंदुभ्याघातनादिते मृदंगशंखनिनदविनादितदिगंतरे २० वीणावेणुस्वनाकीर्णेमहा
कैलासपर्वते परिघाकारसंलग्नपादमूलकसागरे २१ सुधासागरजोत्तुंगतरंगोत्थितशीकरैः वातपोतसमानीतैःपुष्परेणुसमन्वितैः २२ तमाल
वनसंलग्नशीतवातमनोहरे महानीपावनीजन्यतत्सुमोद्धुध्धमारुते २३ शरत्कौमोदकीफुल्लकुमुदामोदबंधुरे फुल्लहल्लकसल्लासिवाततताय
नैर्युतेः २४ गलत्सौद्रमहाधाराजघार्द्रद्रोणभूतले करिकुंभमहाधारापंकिलपुष्परेणुभिः २५ कस्तूरिकामदोद्भूतगंधसंमोदिदिक्तटे विकाचक
मलोदारपरागारक्तभूतले २६ केतकीधूलिकापालिपाटलामोदवायुभिः उदग्रकुरवोद्दामपिप्पलीगंधमेदुरे २७ महागोपुरमध्यस्थमणिसिंहा
सनेशिवो चिक्रीडतुस्सदातस्मिन्महाकेलासपर्वते २८ कदाचित्धीरफलकमंचमध्यस्थितःशिवः देमास्तेसुमनोदामभूषणोगिरिसानुषु २९
क्वचित्प्रासादमध्यस्थाविहरंतंबयाशिवः कदाचित्तरसौमध्येसौधेमंचोत्तरेशिवः ३० क्वचित्सुधाफलोद्दामवनेषुविहरेश्वरः कदाचिदंदोलगतो

मुमुदातेशिवौमुने ३१ हीरसारमहासौधेवीणापाण्याबयासह तंत्रीवक्रसंबत्धरागरक्तोंवयायुतः ३२ तपनोद्दामकिरणसंतप्तांगोवयाशिवः धारासारगृहेतुं
गेविहरत्येवशंकरः ३३ अच्छादर्शतलाच्छिद्र गृहेष्वविहरत्यपि चंद्रचंदनसंलिप्तौशिवौविहरतांवने ३४ कदाचिदास्थानगतोनंदिभृंग्यादिभिःसहमहाकै
लासलिंगानिप्रासादस्थोनिरीक्षते ३५ कैलासेशमहालिंगेकरोत्यर्चनमंवयाक्कचित्सभासुसंध्यायांनृत्यत्यानंदनिर्भरः ३६ षड्वक्रंगजवक्रंचनिरीक्षतिमु
हुर्मुहुः चिक्रीडतोस्तयोरेवंमहाकैलासपर्वते ३७ कस्तस्यवर्णयेदुत्तयाचित्रालीलामहेशितुः त्वयायदुक्तंतद्देवीष्टच्छसिमहेश्वरं ३८ हर्षवर्षयुतंशंभुंसुधासागर
सौधके शंभुःसुधासागरमध्यगोंवांसमभ्यवर्षत्करयंत्रसेचनैः ३९ साचालिसंघेस्वकराग्रसंस्थधाराभिराच्छादयदीश्वरांकं ३९ सितासितसुपाटलीपटलकुंदमं
दारजरजोत्थितमरंदपभ्रमणशीतमंदानिले वसंतसमयोल्लसद्दिजदिनांतसन्मल्लिकालतागृहनिकुंजभूमथितमंचतल्पेशिवः ४० मंचेसिंचतिपुष्पसारसलिलैः
देवोस्तसन्मल्लिकासरभ्रमधुव्रतप्रकटमोदधारायुतः अनल्पकुसुमोच्चयप्रमथ्यमानतल्पेविकीर्णरिंसयतिलोकीलामधुरकाकलीनारवैः ४१ परिमल्लमिलद
लिवृंदमल्लिसंफुल्लवल्लीचलदनिलकुलायोड्डीनपत्राडजैश्च्मधरवरसुजाजीमल्लिधम्मिल्लभल्लीघ्नसुमशरवल्यालीलयाभासशंभुः ४२ फालेकस्तुरिकांतं
तंनिलकमलकजस्फारसौंदर्यधारा नानागंधानुबंधद्युतिदलिकलसत्सांद्रसिंदूररेखां ४३ मल्लिकुड्मलतल्पजंनिचोलमचलाधीशांगजांगेहरः पश्यन्नहृदंतं
मुदापुरहरःसीमंतसीमंतिकांनेत्रैःस्वैरनिमेषकैःप्रतिदिनंस्तौचक्रईशोहरः ४४ तोषोन्मेषमिषेणसात्रिभुवनाधीशंपुषंतंहृदापुष्प्याशेषविशेषशोषितगरंभूषा
कृताहीश्वरं कालाशेषजगत्क्रियादिविषमव्यापारसारादरंसादेविविषयेषुसक्तहृदयंवाचाविशेषेशातु ४५ श्रीशिवाउवाच भोभर्गसर्वजगत्सर्जकपापवर्गसंभ
जेकोरुभवनर्जकभोगवर्ज दुर्जीवजातजनुषांकलिचित्रकृतसंशंभोत्रिनेत्रवदमेकरुणायदिस्यात् ४६ श्रीस्कंदउवाच तद्देवीवचनेनचारुवदनांभोजामुदांशं
करः ध्यानोद्बुद्धसमस्तकालजगतांआपारमूचेहरः पश्यंतद्वदनांबुजंगिरिवरेसौधोरुमंचस्थितोमुंचस्तांकरुणाभरीभरद्दृशासत्यषेवाचंतदा श्रीशिवउवाच
धन्यामन्यामनोज्ञांत्रिभुवनजननींशैलराजेंद्रकन्यांसीमंतिनांवरिष्ठांममहृदयमहानंदवन्मांचजन्यांमन्येचित्तेपिनान्यानवसदृशमहारूपसंपत्समृत्थांस्वधु
न्यांवाविशिष्टांभगवतिभवतींनान्यथेतच्छृणुत्वं ४८ इतिश्रीशिवरहस्येसदाशिवाख्येनवमांशेमुनिवाक्यंनामचतुर्थोध्यायः ॥ ४ ॥ श्रीसदाशिवायनमः
शृणुपद्मामलोत्फुल्ललोचनेपर्वतात्मजे त्वयानाविदितंकिंचित्कालशक्तिस्त्वमेवहि १ त्वमेवशक्तिःपरमाकालचक्रप्रवर्त्तिका त्वमेवपरमासिद्धिःत्वंस्वा
हात्वंस्वधाशिवे २ त्वमेवब्रह्मणोदेवीसर्गशक्तिकरीस्मृता गीयसेत्वंपुराणज्ञैःसासाद्देवीसरस्वती ३ सर्वशब्दमयीविश्वंपुनासिपरमेश्वरि त्वंविष्णोःपद्मजाशक्तिः

सर्वपालनकारिणी ४ त्वयासमृत्स्वंयत्किंचित्तद्धस्थिमधिगच्छति त्वमेवरुद्रेपरमाशक्तिः संहारकारिणी ५ त्वंप्रभासित्तथाभानोदहनेदहनात्मिका पवने
चालनीशक्तिः त्वंकांतिः सोममंडले ६ इंद्रेप्रभुत्वशक्तिस्त्वंयमेदंडात्मिकाह्यसि धनाधिपेनिधिमयीनैरृतेखड्गरूपिणी ७ वरुणेपाशशक्तिस्त्वंत्वंसर्वमा
त्वमंडलंत्वयेवशक्तिमानस्मिअस्मिन्भुवनमध्यमे ८ अमूर्तोहंत्वयामूर्तिंगृहीत्वाक्रीडयाम्यहं लोकमेनंमहादेवीतस्मान्मेशक्तिमत्तरा ९ भुवित्वंधरणी
शक्तिर्नदीषुसदरूपिणी एवंत्वन्मयमेवेदंजगच्छक्तिसमुद्भवं १० तस्मात्कालात्मिकाशक्तिः कालरूपंवदामिते शृणुत्वंसावधानेननारिअर्थंयस्यकस्य
चित् ११ रहस्यमद्भुततरल्लोकपूर्वंमयोदिके मत्स्यमेवाहवृषभपादास्तेयुगमूर्तयः १२ कृतंत्रेताद्वापराख्याकलिकालयुगादयः पादसंधिखुरायेनुतेस
र्वेयुगसंधयः १३ युगेषुधर्मवृषभःपादान्संहरतिद्ध्रुवं मदाज्ञावशतोदेवीकालचक्रप्रवर्त्तकः कृतेचतुष्पाद्वृषभः कैलासेधिष्ठितःसदा वर्णाश्रमांगोइष्टा
दिपूर्त्तधर्मोरूपादवान् १५ पूर्वपादौवृषस्यास्य कृतेत्रेतेनितिष्ठिमद्वापारश्चकलिश्चनिपश्चात्साद्रावुभावपि १६ कृतेचतुष्पदस्तिष्ठेद्वृषभोमेग्रतः
सदा कैलासेतेनधर्मोपिसात्विकः संप्रजायते १७ देवतिर्यङ्मनुष्येषुनृपेषुभुविचाविकेतपस्विषुदमोदानंसंविभागोयथारुचिः १८ इज्याध्ययनसंप
त्तिः क्रोधमात्सर्यवर्जनं ब्राह्मंकृतयुगेप्रोक्तं ब्राह्मण्यंतत्रवर्धते १९ त्रिपुंड्रधारणंपुण्यमग्निरित्यादिमंत्रतः भस्मनोद्धारणंगोरीतथारुद्राक्षधारणं २०
लिंगार्चनंरुद्रजपोपंचाक्षरजपस्तथा शापोत्सर्गोनचक्रोधादृषीणांवैकृतेयुगे २१ मरीचिरंगिराअत्रिःमित्रावरुणएवच कश्यपोथभरद्वाजःसंवर्तश्चबृह
स्पतिः २२ एतेकृतयुगेदेवीवेत्तारोधर्मनिश्चयं राजानःसोमसूर्येचसंभवाःपुण्यकीर्तयः २३ हरिश्चंद्रोमरुत्तश्चमांधातासगरःपृथुः अनरण्यान्नगोव
भ्रुरायुःशिबिस्तथा २४ एषुशास्त्सुपृथिवीफलसस्यसमालिनी कालवर्षीचपर्जन्योनचास्यंदंतिनित्यशः २५ अश्वमेधपराःसर्वेदाक्षिणावलवन्तराः
अक्षौहिणीनांपतयःक्षोणीशाशिवभावनाः २६ भस्मरुद्राक्षसंपन्नालिंगार्चानिरताःसदा अनरण्येमहीपालेनारण्यानीरभूत्त्वभूः निर्दस्युराष्ट्राराज्ञा
नोयायज्वकाःप्रियंवदाः दातारोरक्षितारस्तेजेतारःसमरेरिपून् २८ गोरक्षारसवाणिज्यंवश्यावैश्याः कृतेयुगे शूद्राःशुश्रूषवःसर्वेत्रिषुवर्णेषुनिस्पृहः २९
नरानार्योविशःशूद्राःसत्यनिष्ठाःकृतेयुगे नस्वैरिण्योनानृतकाःसर्वेधर्मप्रभावनाः ३० मानवेहिकृतेधर्मःश्रुतिप्रोक्तोविशिष्यते वर्णाश्रमेतथासर्वेस्वेस्वे
कर्मण्याधिष्ठिताः ३१ एवंकृतयुगेधर्मोपश्यदेविप्रवर्त्तते दयादाक्षिण्यसंयुक्तोत्र्यक्षपादानुवर्तनात् ३२ एतत्तेसंग्रहेणैवकृतेधर्मःप्रकीर्तितः कृतेसुकृ
ताशयोभुविभवतिसर्वेष्वपिनचानृजुककापथोभवतिकश्चिदेवेहमे पदाब्जसमर्चकोभवतिलोकमालोकयःश्रुतिप्रकोर्त्तितोवृषोभवतितेषुचायुःपरं ३३

शतायुतभवंसदाभवपदांबुजाराधनात्सुनिश्चितमिदंशिवसुहृत्तमेनदालोकृतं कदाचिदपिहीयतेननुसुहृत्स्थमेन्निद्वृतंतपस्विजनवल्लभःपरमदुर्लभोयंयुगः३४
इतिश्रीशिवरहस्येसदाशिवाख्येनवमांशेमुनिवाक्यंनामपंचमोध्यायः ५ श्रीईश्वरउवाच त्रेतासुवृषभोमद्यत्रिपादश्चप्रतिष्ठितः कैलासेसंवसद्देवीपादानंदसंततः
१ इज्याप्रतिग्रहस्वात्रकृषिगोरक्षसेविनः ब्राह्मणाःक्षत्रियावैश्याःस्त्रियाःशूद्राश्चसंकराः २ सात्विकोरजसामिश्रागुणस्तेषूपजायते इज्यैववर्धतेलोकोहिंसयैवं
विवेकतदा ३ प्रवर्तिष्यंतिमुनयोश्रुत्युक्ताचारतत्पराः भृगुश्चजमदग्निश्चवसिष्ठश्चपराशरः ४ कात्यायनोजामदग्निर्विश्वामित्रादयोद्विजाः क्षत्रियाश्चद्विजाःसर्वे
तत्रधर्मप्रवर्तकाः ५ वर्णाश्रमेषुकथिताः तत्रसंवर्तकादिताः तपःफलमथांतत्रइज्यास्वर्गार्थमेवहि ६ तत्रापिभस्मनिरताःत्रिपुंड्रांकाद्विजासदा रुद्राक्षधारिणः
सर्वेरुद्रसूक्तजपादराः ७ पंचाक्षरपराःसर्वेरुद्रलिंगार्चनप्रियाः रुद्रक्षेत्रनिवासास्तेत्रेतायांभक्तितत्पराः ८ सोमसूर्यान्ववायेचराजानोभूरिदक्षिणाः ययातिर्न
हुषोरंतिदेवोथऋणविंदुकः ९ भगीरथोदिलीपश्चरामोदाशरथिस्तथा सोप्यगस्त्यमनुप्राप्यभस्मरुद्राक्षभूषणः १० जपन्नामसहस्रंमेरावणंदारहारिणंविजि
गायसुरान्मोमेधेनायजदीश्वरं ११ सेतौमल्लिंगमाराध्यपापान्मुक्तोबभूवह दानारोरक्षितास्तेभुवोमंडलमंडनाः १२ भस्मरुद्राक्षसंपन्नायायजूकाःशिवार्चकाः
तेषुशासत्सुपृथिवींसयुक्तौषधीष्वपि १३ पर्जन्यःकालवर्षीस्यात्सर्वेधर्मैकजीवनाः वणिजःपण्यनिपुणाःपुण्येषुनिरताःसदा १४ विरतापापकर्मभ्योइभ्याः
सभ्याःसदैवहि शूद्राशुश्रूषवःसर्वेसर्ववर्णेषुनित्यशः १५ स्त्रियःसतीव्रताःसर्वावर्णिनःपर्णभोजनाः अपर्णापतिपादाब्जतूर्णसंपूर्णदृष्टयः १६ ग्रहस्थास्वस्थचितास्ते
विश्वस्ताधर्मवृत्तयः वन्यासन्याशिनोपीशेनपरेसंवप्रवर्तिनः १७ रुद्राक्षभस्माभरणाशरणाशिवपूजने करुणाविष्टहृदयामरणेपिप्रतिक्षणं १८ अयुतेने
षुचायुर्हितपोधर्मोपिवर्तते स्वाध्यायशरणाःसर्वेशिवध्यानहृताशुभाः १९ नद्यश्चस्पंदतेनित्यंफलंतिवनराजयः घयेध्मत्तास्तथैवाघ्नःसर्वेधर्मैकजीवनाः
२० शिवैकदेवाःसर्वेपिशिवार्चनपरायणाः देवाहविर्भुजःसर्वेसर्वदाशर्वपूजकाः २१ त्रिनेत्रपूतपादाब्जध्यायिनःसत्रजीविनः दैत्याःशर्वार्चनरताःसर्वदास
मरोत्थिताः २२ कृतेहिरण्यकशिपुःहिरण्याक्षश्चवृत्रकः एतेवैदैत्यराजानोमयैवप्रेरिताःशिवे २३ गर्वनिर्वापणार्थायसुराणांचपदेपदे त्रेतायुगेरावणश्चब
लिःप्रल्हादएवच २४ नमुचिश्चकुजंभश्चान्यपादैस्तांशजास्तथा गर्वापहरणार्थायसुराणामेवतेंबिके २५ मयास्पृष्टाविशिष्टास्तेममपूजापराहिते राजसा
तामसोपेताःसुरेषुप्रभविष्णवः २६ यदातैर्निर्जितादेवाःतदामसमर्पया तेषांगर्वापहारायधर्मसंस्थापनायच २७ मत्पदाब्जेतदाभक्तिंविष्णवेतांददाम्यहं त
याभक्त्यायुतोविष्णुरवतारेषुमामयजत् २८ लब्धचक्रस्तदादैत्यान्निहत्वादेवसत्तमः एवंत्रेतायुगमुखेकृतोधर्मोमयांबिकेसात्विकोरजसामिस्त्रोमिश्रोधर्मःप्र

वर्त्तते क्षात्रत्रेतायुगंप्रोक्तंक्षत्रियस्तत्रवर्धते ३० त्रेतास्वग्नित्रितयजनितःश्रौतधर्मोमखेज्यावाणिज्यंचप्रभवतिजनोयायजूकःसदैव श्रीरुद्रार्चाश्रुनिजनयनहृत्तापसं
तापहीनोलोकेःशोकैर्विहीनोभवतियुगवरेपश्यदेवेश्वरित्वं३१ इतिश्रीशिवरहस्येसदाशिवांशेनवमांशेमुनिवाक्यंनामषष्ठोध्यायः६ ॥ ६ ॥ श्रीईश्वरउवाच
द्वापरोक्तानिमान्धर्मान्शृणुत्वंनगकन्यके पाश्वात्पपादैःकैलासेद्वषोधर्मस्थितोभवेत् १ राजसागुणतःसर्वेभवंतियुगसंभवाः जीवंतिचसहस्रंतेनेत्तगुणेनैवपार्वती २
तेचयंतिविरूपाक्षंरुद्राक्षाभरणानराःभस्मजन्यत्रिपुंड्राकाःरुद्राध्यायार्थपारगाः ३ पंचाक्षरपराःसर्वेशिवलिंगार्चनप्रियाः ब्राह्मणाःक्षत्रियावैश्याःशूद्रानार्यश्चसंकराः ४
शांकराएवसर्वेपिद्वापरेतपसिस्थिताः वर्णास्वमाचाररताद्विजासौम्याःप्रभावताः ५ गर्गःपराशरोधौम्यउपमन्युर्दधीचकः कण्वश्चगौतमश्चैवदूर्वासादत्तएवच ६ सर्वेशर्वा
र्चकाविप्राभस्मरुद्राक्षभूषणाः तरुणेंदुकलामौलिलिंगार्चनपरायणाः ७ ग्रहस्थायतयश्चैववर्णिनोवनजीवनाः स्वाश्रमाचारनिपुणाःपुण्याःसर्वेपिराजसाः ८ तत्रधर्मःप्रव
र्तेतशंखोलिखितचोदितः राजानस्तत्रसुजनाःगयश्चैवउदावसुः ९ क्रूरुःपूरुःशतायुश्चपुरुजिद्भरतस्तथा यादवोवासुदेवोथरामोपिबलभद्रकः १० दुर्योधनादयःसर्वेधार्त्त
राष्ट्रामहौजसः देवासुरसमुद्भूताःद्वापरेविग्रहेरताः ११ अन्योन्यमुपहिंसंतोराजसानमसेनच यथासंभवधर्मेणवर्त्तंतिद्वापरेनृपाः १२ सर्वराष्ट्रेषुदेशेषुविषयासक्तचेतसः तेष
हंतामसीवृत्तिर्द्दामिप्रतिजन्मनि १३ यायजूकावदान्यास्तेदातारोद्वापरेनृपाः वैश्याकृष्युपभोक्तारःगोवाणिज्यरसक्रियाः १४ आढ्यामीदुष्टमाचार्यायांनिरताःशूद्रजातयः
स्त्रियःसत्यस्तथासर्वेशुश्रूषानिरताःसदा १५ कालेवर्षतिपर्जन्यउर्वराशर्वपूजया रसयुक्ताभवेत्तस्मिंयुगेवैसंयुगेरताः १६ वियोगरहिताःसर्वेयोगयुक्ताःसदैवहि या
गैर्देवान्यजंत्येवत्यजंतिकलहंनराः १७ कुलजाश्चनराःसर्वेजलजोपमदृष्टयः विसृष्टयःप्रजायंतेपिपिविष्टपदाश्रयात् १९ इष्टापूर्त्तमहाधर्मस्त्वभिवृत्त्योभविष्यति त
स्मिन्नृपाःशांतनवायादवाःपृथिवीभुजः १९ पांडवाव्याससपौत्रास्तेअक्षेसंत्यज्यभूमिकां वनेवन्येनजीवंतित्र्यक्षार्चामहिमावशात् २० पुनस्तेपृथिवींप्राप्यधार्त्तराष्ट्रैश्चवि
ग्रहं उग्रप्रसादात्कृत्वैवनिग्रहंवीर्यवत्तराः २१ बुभुजःपृथिवींतेवैयायजूकाःप्रियंवदाः अश्वमेधेनदेवेशंसाक्षान्मेधपतिशिवं २२ यजंतिशिवलिंगेपिवासुदेवेनचाविके उ
पमन्युप्रसादेनकृष्णोयदुकुलोद्भवः २३ लेभेसपरमांसिद्धिंमल्लिंगार्चाबलेनहि विजिग्येबलिजंबाणंदोःसहस्रैकजीवनं २४ तथान्यान्मुरकंसादीन्नरकंदैत्यनायकं मधुरा
मास्थितोदेविद्वारवत्यामपिस्थितः २५ अश्वत्थामाद्रोणसुतोममपूजाप्रभावतः मयादत्तेनखड्गेनजिगायारीन्रणेतदा २६ लेभेत्सपरमांसिद्धिंलोकद्यापिप्रदृश्यते द्वाप
रांतेपिचनृपापारिक्षिज्जनमेजयः २७ अश्वमेधेनदेवेशमियाजाहिमखैनहि पितरंतक्षकोद्भूतविषेणाद्दीक्ष्यतंमृतं २८ तक्षकंशक्रसाहाय्यान्मोचितोनृपसत्तमा द्वापरे
धर्मनिपुणापुण्यपण्यैकजीवनाः २९ अरण्येषुविशेषेणतपसाशोषयंतिच ऋषयःकृषिवाणिज्यमृषावादपराङ्मुखाः ३० सुमुखाश्चतथालेखाद्वापरेपारदर्शिनःसम्य

मानायथाजोषंयजमानामखेष्वपि ३१ विषयेष्वपिकाषायावसनाकामवासनाः भवंतिद्वापरजनाःद्विपाद्धर्मोत्रतत्रहि ३२ द्वापरेधर्मरूपात्मामहान्धर्मवृषोंबिके प्रभ
वत्येवसहसाकालचक्रप्रवर्त्तकः ३३ युगसंधिषुवर्षाणांसहस्रंतद्युगानुगं पौर्विकंसंप्रवर्तेतनत्तद्युगभवंगुणं ३४ दशलक्षंस्मृतनेसंख्यात्रेतायांपंचलक्षकं द्वापरंस्तुत्रि
लक्षंस्यात्कलिःप्रोक्तोद्विलक्षकः ३५ द्वापरेवैश्यपयुगःकृःतस्मिन्नेवंप्रवर्त्तते एवंयुगानांपरिवर्तमानेःशनैश्चकल्पोभवितोंबिकेतदा ३६ कल्पेःशनैस्तत्रविधेरथायुस्त
स्यायुषोंतेहरिणान्हमाने ३७ एवंहरेस्तत्प्रतिमेश्चकल्पेःरुद्रस्यचैवायुरितिस्मरांबिके एवंमनुनामथभूतभव्यमानंऋषीणामथशक्रसंख्या प्रोक्तापुराणेषुविशेषतोंवि
केनस्मात्वयाहंकिलकालहीनः मदुन्मेषोन्मेषोयुगशतगत्तीनांप्रविलयोहरिब्रह्मेशानांशतमखमनूनांदिविषदां ऋषीणांसप्तानांभवतिपरिमाणंकिलशिवेमताकालस्ये
यंगतिरपिजगंनश्वरमिदं ३९ इतिश्रीशिवरहस्येसदाशिवाख्येनवमांशेद्वापराधर्मकथनंनामसप्तमोध्यायः ७ श्रीईश्वरउवाच कलिःस्वरूपंवक्ष्यामित्वंदेविशृणुहर्षदं
योधर्मरूपोवृषभःकैलासेत्वेकपाद्भवेत् १ तेनधर्मोह्रसत्येवकलौतामसजोगुणः नदांताःक्षत्रियास्तस्मिन्विक्रमाद्याःततःपरं २ शालिवाहनसंज्ञश्चकलालेषुनृपोभवेत्
मुंजभोजौभवेतांवैततश्चोलाश्चषोडश ३ भस्मरुद्राक्षसंपन्नाशिवभक्तामहौजसः शिवालयकराःसर्वेदेशेराष्ट्रेचचोचलके ४ सह्यजातीरनिलयाराजानोद्रविडाधिपाः
चोलापंचशतंदेवीराजानःपांड्यवंशजाः ५ मलयध्वजसंभूताःयत्रजातात्वमेवहिहालास्यनिलयादेवीमीनाक्षीसुंदरेश्वरः ६ अहमेवमहालिंगेनिवासमिकलौशिवे
भविष्यंतिमहीपालैश्चेचोलेचपांड्यके ७ शिवभक्तानराःसर्वेतेषुशासत्सुशंकरि सहस्रवत्सरेसर्वेशालिवाहनविक्रमौ ८ ततश्चोलाःकलौपांड्यःसहस्रद्वितयंशिवेभ
विष्यंतिमहीपालाःततःशूद्राश्चसंकराः ९ आंध्राणांनृपषट्कंवैनृपाणांवैभविष्यति आर्यावर्तविमुक्तेचक्रतक्षेत्रेविशेषतः १० म्लेच्छाभूमिभुजःस्वैरंभविष्यंत्यस
मेधसः पंचाशतंवत्सराणांशूद्रमांडलिकानृपाः ११ दस्युप्रायाभविष्यंतिशिवेमदंशसंभूतःशंकरःशांकरोत्तमः १३ चतुर्भिःसहशिष्यैश्चकलावपतरिष्यति तस्मैचाप
निषद्विद्यामयादत्तामहेश्वरि १४ भूमौपाखंडषंडानांखंडनंसकरिष्यति कलावपिमहादेवहरदत्ताभिधाद्विजः १५ अशैवदंडनार्थायभविष्यतिमहीतले दी
क्षितोपिभवेत्कश्चिन्मदंशोभूसुरोंबिके १६ भासुराचारनिरतःशैवःछंदोगवंशजः शैवशास्त्रंतथाभूमौलुप्तंविस्तारइष्यति १७ अन्येपिभक्तादेवेशिचेदेचोलेच
पांड्यके भविष्यंतिमहाभक्तामयिसर्वासुजातिषु १८ त्रिषष्टिपरिमाणास्तेप्रमाणाभक्तिहेतवे सुंदरोज्ञानसंबंधस्तथामाणिक्यवाचकः १९ तेषुमुख्यास्त्रयोपिमत्तश्च
रित्रंवदाभिते अगस्त्योममभक्तोहितथान्येब्राह्मणर्षभाः २० भवभक्ताभविष्यंतिकालावपितपोबलात् सह्यजातीरलिंगानांमहिमानंशिवेद्भुतं २१ वर्णयंत्येवतेदेवि
अगस्त्योक्तेनभाषया द्राविडेनैवदेवेशिमयितत्प्रीतिदायकं २२ राजानःकिलदस्यूवंशजनिताःपापास्तथामांडलाविप्रद्रोहपरायणाःशिवमहालिंगालयोच्छेदकाःरुद्राक्षा

मलभस्मधारणामहालिंगार्चनावर्जितालोकेकेवलनामसाः प्रतिकलौजायंतएवंविके २३ मन्त्रैर्वेदविवर्जिताः प्रतिकलौसद्विद्ययावर्जिताः दुष्टाशिष्ट
समाङ्वमहाकष्टेकनिष्ठाः शिवं संतुष्टाशिवतिंस्याद्रमहा श्रीलिंगसाम्यार्चयातिचक्रोपलनतप्तचक्रसुमहाफालोर्ध्वपुंड्राजडाः २४ कर्मदिनेपिविरलाहरपा
दपद्मसंपूजकाभसितफालत्रिपुंड्राः वेदानशंतिगुरुस्पूजनसक्तचित्तामनाइवप्रतिगृहेषुचभिक्षितान्नाः २५ उर्वीनिर्वीर्यतानाकलिमलजेजलानिष्टनि
ष्टानयुक्ताशिष्टाचारेकनिष्टस्सुभिक्षरूपशांतेःम्लेच्छतुच्छप्रतिष्ठा सतेपिनिः सत्वताधीजेनजनुरफलपंडपाषंडधर्मोलोकश्चित्रभवेतशंकरपदध्यानानुरक्तः
कलौहूणास्थूणकराश्वशोणितमुखाः भूणप्रभाभाविताः गीर्वाणानपिजेतृशक्तिनिवहेः पापाग्रपाणीगणाः घोणाघर्घरसाम्यवाद्यजमहानिःसाणविश्राणि
तोस्तोभायाधिपुरसंचरंतिहिकलौनीलाजिनोभूषणाः २७ नित्यानुष्ठानुष्ठानभवतिहिजनःतुष्टिपुष्ट्यावियुक्तः भ्रष्टः शिष्टविनिंदकः कलियुगेजेष्टार्च
नावर्जितः दारिद्र्यार्णवमध्यगस्तनुरिंद्रियप्रभावर्जितोऽमात्राविनमुद्गुताखिलतनुः भ्रांतोत्रसंमुह्यति २९ कलिकुलकलनाकलाकुलोयप्रभवाकीलि
तकालकोलमूले मृगवालधरंजनोभजेत्किं जितकालंनरहृत्तमूलजालं २९ पापानुतापमतिभाक्सुकरोनरःकिंदुष्टोरुस्करसमःसतुरासभोपि भूभा
रएवकुनरःकलिकालजातोमारारिपादकमलोदरदूरभृंगः ३० संतप्तचक्रकचोपमानसुमहाचक्रांकमुद्रान्वितोनक्राकारकचक्रफालतिलकोभूयाज्जनोवैकलौ
तेनाक्रांतजनेनदुर्जगदिदंशक्रेपिविन्नासकंउक्रांत्युत्तरगर्जनोघमगतोतक्रावुवक्रोशक ३१ इतिश्रीशिवरहस्येसदाशिवांशेनवमांशेकलिवर्णनेअष्टमोध्यायः ८
ईश्वरउवाच पुनःकलिभवंदेविगुणंनेकथयाम्यहं नानादुराचाररताः अभक्षान्नेकभक्षकाः १ सुरासवरताः पापाःभविष्यंतिकलौनराः भस्मत्रिपुंड्रहीना
गारुद्राक्षाभरणोज्झिताः २ भविष्यंतिकलौपापाःसततंनिरपत्रयाः लिंगार्चाविमुखाःसर्वेसुमुखाविष्णुपूजने ३ शालग्रामशिलासाम्यंशिवपूजांप्रकुर्वते ऊर्ध्व
पुंड्रधराःसर्वेमृदाफालोदरेगले ४ तप्तचक्रांकिताकेचिद्व्रात्याव्रतविवर्जिताः भविष्यंतिकलौपापाःसततंनिरपत्रपाः ५ वैष्णवाविष्णुपाषंडाशिवोत्कर्षास
हिष्णवः भविष्यंकलौपापाःस ६ मद्यालयप्रशकराः मन्निंदानिरताःसदा भवि ७ वर्णाश्रमपरिभ्रष्टाविष्टाक्रिमिसमाकुलाः भवि ८ वेदाध्ययनहीनाश्चश्रौत्र
ताग्निपरिवर्जिताः भवि ९ दुष्टाःकष्टैकमतयःशिष्टवद्भ्रष्टधर्मिणः भवि १० शिपिविष्टार्चनाहीनदुरदृष्टेनशंकरि भ ११ जाराचोरास्तथाघोरादुष्पूरस्योदर
भराः भवि १२ धर्मध्वजाः द्विजाःसर्वेवृजिनेनविमोहिताः भवि १३ पंचाक्षरविहीनाश्चरुद्राध्यायजपोज्झिताः भ १४ मत्क्षेत्रवासरहिताअन्यक्षेत्रैक
वासिनः भ १५ सोमवारेदिवास्वेच्छंभोजनाच्छादनेरताः भवि १६ प्रदोषपूजारहिताः सर्वेदैवनिशामुखे भ १७ कालाष्टम्यामिंदुचूडपूजाध्यानपराङ्मुखाः भ १८

भूतासुभूतनार्थोर्चाविहीनमनसोनराः भ॰ १९ मत्स्येत्रमनस्क्षेत्रेणाअविमुक्तंवदंतिचभ॰ २० मन्नाममन्यनाम्नैवसमंतेहिवदंतिचभ॰ २१ गोघ्नाब्रह्महणोघोरपरस्वादाः
शिवद्रुहाः भ॰ २२ परापवादकुशलाअनिरुध्यपजीविनः भ॰ २३ राजानोर्थपराःसर्वेपरान्नादाद्विजाःसदाः भ॰ २४ अरक्षितारोहर्तारःसंग्रामविमुखाःसदाभ॰ २५ वे
श्यावेश्यापराःसर्वेतुलाचौर्येणजीविनः भ॰ २६ गोरसानांक्रयपराःद्विजाःतंडुलविक्रयाः भ॰ २७ अफलाश्चमहीपालापलाश्चाश्रांतिलालसाः भ॰ २८ परदारपराःसर्वे
स्वदाररतिवर्जिताः भ॰ २९ ग्राम्याहारविहाराश्चजगत्संहारकारकाः भ॰ ३० वृक्षोच्छेदपराःसर्वेसरोवरविभेदकाः भ॰ ३१ नदीकूपैकभेत्तारःतेशिवालयभेदकाः भवि॰ ३२
पापसंतापबहुलाबह्वाशाबहुयाचकाः भ॰ ३३ दरिद्राव्याधितामूर्खाअप्रजाःसप्रजाःस्तथाभ॰ ३४ अल्पायुषोनराःसर्वेस्त्रियोबालाबलाद्विजाः भ॰ ३५ वर्धनिशूद्राभू
पिष्ठाकाषायालंकृतांगकाः भ॰ ४० शूद्राधर्मप्रवक्तारोब्राह्मणाश्रवणेरताः भ॰ ४१ त्यक्तवर्णाश्रमाचाराःनिःसारास्ताःप्रजाःकलौ भ॰ ४२ भंडवेतंडकुशलापाषंडागानत
त्पराः भ॰ ४३ गणिकापरिहासाश्चगणकागुणवर्जिताः भ॰ ४४ कनकाभ्यासकुशलाकमहत्याशिनोद्विजाः भ॰ ४५ यंत्रमंत्रपराःसर्वेसंवादविचक्षणाः भ॰ ४६ वै
द्यविद्यासुनिपुणाकुत्सिताश्चचिकित्सकाः भ॰ ४७ ज्योतिज्ञीनविदःसर्वेद्यूतविद्याविदोनराः भ॰ ४८ स्त्रियःकिलसंचरंतिविधवाबालाबलाःकेवलंतीर्थयात्रा
नमिरिव्रजोत्सवमिषापूर्नामनोहारकाः पूनश्चापनुसंचरंतिहिमिथोतत्संगनिष्ठाकलाहृद्दंशलनिर्भयाभाजनपदाकेशेकशूलास्त्रियः ४९ तीर्थान्यप्यतिपं
किलानिहिकलौशैवालजालावनान् पशुपक्षिनराणांचलिंगरहितंचाक्छिद्यम्लेच्छाधमाः स्वस्थानगतंकीकसानितनुतेकालस्यलीलागतेः क्षुद्राएवभवंति
भोगभरिताविप्राःसुधार्निर्गताः ५० कलिजाकुलजातिमानदीनाधनगर्वेणपरिभ्रमंतिनित्यं मनुपोषणायोषितोरसंगेनिरताएवभवंतिकेवलाद्याः ५१
योधर्मश्चात्रकश्चित्कलिकलुषमनस्सर्ववक्तासएवनर्मोक्तासुखिनोभवंतिकनरयाभेकभोगस्पृहाः वर्मशर्ममयंदधतिभुवनेचर्मावृतांताःप्रजाःक
र्मण्यप्रतिमानिदुष्कृतिपराण्यानन्वनेकेवलं तेचायुर्देशकालोक्तलिकलुषानराःतापसेनीक्ष्णशक्त्यायुक्त्याभुक्त्यानुसूक्त्याकलयतिनियतंचानकोंतायमर्त्यान्
५३ मर्त्याअप्यतिसर्वशिल्पकुशलाकौशल्यमात्रादरामारापाराखाराभिघातसुमहाधीरेकसाराःकलौ म्लेच्छाचारसुचंचुराःकलिनरास्तेवानराःकेवलं
नंदंत्येवसदैवहृष्टमनसातेपामरश्चाविके ५४ उद्धुरअप्रतिभासभासिकहृदाकुर्वंतिसर्वाःक्रियाः स्वल्पेनाल्पमदाभवंतिचसदासत्पात्रदानोज्झिताःयवना
स्यवनेषुविप्रवृंदग्यसनाम्यसमीक्ष्यलुंठयंति पिशुनान्निशितान्नसुनामिवद्रुनमीशेलशुनाशिनोग्रदंतैः ५५ कलौकलुषिताशयाभुविभवंतिबालाबला
वितर्ककुशलायसानलविरोधकालाशयाः पतंतिनरकेखलामलजलाविलेकेवलंशिलासुबहुलासमाः क्वथिततैलदुःखगकाः ५६ दृढंमृडवि

निंदयापरिवृडोरुदंडाहताः विमूढमतयः कलौ परिविशंति गाढतमः अनर्गलनिर्गलार्गलगलादिपादाग्रयोर्लुठंति कमठाइवार्भटीभटकर्मरशस्त्र
हताः ५७ मृत्कालाभसितत्रिपुंड्ररहितारुद्राक्षमालोज्झिताः कटुरुद्रार्चनरुद्रजाप्यरहितापंचाक्षरेणोज्झिताः कुर्वंत्येव कलौ कलुषधातुं चैव कर्मा
णि नेभ्राम्यनेवसंदेवमेयमगृहे संततप्रचक्रोत्कृताः ५८ भ्रष्टास्तेदुरहंकृतः प्रतिकलौ विष्टानुलिप्तांगकाः शिष्टाचारविवर्जिताष्टकरुणामूर्तेः पदार्चोज्झिताः
ते वै संकरसूकरीखरखरीयोनीषुभूत्वाचिरं दुष्टाः कुष्ठशरीरिणः प्रतिगृहं हिंडंति कष्टोज्वराः ५९ आधिव्याधिउपाधिभिर्विधिवशाद्दाशासुहंमाशया
सेवंति प्रसभं कुभांडकनृपान्दुष्पूरविष्टोदराः ये वा रांतिधिजाविलासलसितैरलस्पतः स्तपज्ये वै कैलासाचलवासिनं कलियुगे नाराधयंतिक्षणं ६०
विश्वस्ताश्वासहीनास्वजनपरिजनेश्वानवद्घोषमाणायोषाभूषापहाराः सततमृषवचस्तिष्यजातामनुष्याः मातापित्रोर्गुरोर्वाद्विजगविसृजनेपूषयो
षादिहीना आयुःशेषं स्वपंतो विषविषयपरामेषवन्माषवर्णाः ६१ वालावलासुवलवत्वनहारिणस्ते स्तेनानराभुवि भवंति कलिप्रतिष्ठाः उद्वेजकाश्च नृपु
गोषु च मूषपापास्ते दस्यवो सुवसुहारिण एव पश्य ६२ दुर्भेदस्दरीभराः परसुतल्पभोगादरासुरासवगरादनाभुवि भवंति नार्यो नराः कलौ परमनस्करः शिव
मयस्करानर्चका अहःस्करविनिंदकाः परमहंस्कराः स्तेनमः ६३ इति श्रीशिवरहस्ये सदाशिवाख्ये नवमांशे नवमोऽध्यायः ९ ईश्वर उवाच पुनः क
लियुगे घोरे वात्तवर्षोपसर्गकाः सर्वे दुर्गावैनायकार्चकाः २ वराटिकाधराः शाक्ताः ढक्कावाद्येव जीवनाः चक्रांकाश्च तथा पापाः सर्वे वै लिंगवक्षसः ३ भविष्यं
ति कलौ देवि धर्मविक्रयिणो जनाः दुष्टाभक्षप्रियाः सर्वे पलांडुलशुनाशनाः ४ शूलपाषंडवेतंडभंडैः सह वसंत्यपि गणकागणिकावेश्याज्योतिर्वैद्या
नजीवनः ५ भर्गोपजीवना सर्वास्त्रियः कामपराहताः भविष्यंति कलौ पापाः सततं निरपत्रपाः ६ अनिर्दंड्याश्च राजानो निर्दंड्याश्च महत्स्वपि अप
राधेष्वपि खल्वेविप्राउंछोपजीविनः ७ मत्स्याधिपत्तयस्सर्वे यत्नयाच्यन्ततत्पराः भविष्यंति कलौ पापाः सततं निरपत्रपाः ८ गां वाहयंति दुष्टास्ते हले
षु नियतं कलौ शृण्वंतु वृषलेष्वेव वेदानुस्वैर्वदंति च ९ शिष्याः सर्वेपि गुरवः गुरवः शिष्यतां गताः मातापित्रोरपोष्टारो भार्यावाधवहर्षदाः भ
वि० ११ वालवत्सां तथा गां वै दुहंति क्षीरवांछया श्वाश्वश्वशुरजामातृभोजयंति शिवे धमाः अन्यधर्मान्नाशयंति स्वधर्मस्थापनाय हि समाजोत्स
वके देवि देवानां पूजका नराः १३ शूद्रा धर्मं वदिष्यंति ब्राह्मणा एव शंकराः ग्रहस्था याचका एव नान्नदाश्चातिथौ शिवे १४ वर्णिनः कामसंसक्ताः स्र
ग्गंधाभरणप्रियाः वनस्था ग्रामनिरता विरताः सर्वकर्मणि १५ शूद्रास्तपस्विनः सर्वे नखलोमजटाधराः तीर्थान्यनुचरिष्यंति पाषंडास्तु कलौ शिवे १६

पंचयज्ञोज्झिताः सर्वे पंचपापोपजीविनः भ॰ १७ उन्मत्ता विकटा मुंडा विरूपा पाणिवर्जिताः अंधाश्च वधिरास्तद्वा कुब्जाः पंगव एव हि १८ हीनांगा अतिरि
क्तांगाः कृशाः स्थूला पिचंडिलाः भ॰ १९ स्त्रियो बह्व्यः कलियुगे परुषा निंदका बहू गावो द्विजाश्च नश्यंति शूद्रहर्षप्रदो युगः २० सरांसि चाश्मसन्नानि निष्फला
वनराजयः निःसारौषधिधान्यानि द्रुमकार्श्यं सदा कलौ २१ दरिद्रा बहवो देवि दातारो विरला भुवि अन्नतोयप्रदो यस्मात्स महान्स्यात्कुटुंबिनः २२ तिल
तैलक्रयपराः फलानां च रसस्य च कंबलक्रयणाः सर्वे द्विजा वार्धुषिका अपि २३ निरग्नयोऽथ विधुरा व्रात्याः पापपरायणाः दातारमवमन्यंते तथा धर्मप
रायणं २४ क्वचित्क्वचिद्भविष्यंति शैवाः परिमिताः कलौ अशैवास्तान्हनिष्यंति मद्यपा इव केवलं २५ वृषलीपतयः सर्वे नरा नार्यश्च संकराः शांकरः
कोऽपि न भवेत्सर्वे देवार्चकः कलौ २६ रुद्राक्षभस्मपुंड्रांकं दृष्ट्वा सूयापरा नराः ऊर्ध्वपुंड्रकराः सर्वे मृदा चंदनतोऽपि च २७ वैष्णवाश्च तथा शाक्ताः मद्य
मांसाशनप्रियाः बहवस्ते भविष्यंति शवराश्च कलौ नराः २८ कन्याशुल्काभिरध्येवजीवंते च कलौ नराः संवाहनकरा घोरा कीकटे कर्कराइव २९ वसं
ति मधुमत्स्यादा द्विजा अपि कलौ शिवे एवं वर्णाश्रमा अपि भेसंकराः शूद्रभूयसः ३० वायसा इव निघ्नंति कार्पासक्रयणा नराः दंभाहंकारनिरताः क्रोधासू
यापरायणाः ३१ दयादाक्षिण्यरहिताः शौचाचारविवर्जिताः सर्वे पशुसधर्माणो भविष्यंति शिवे कलौ ३२ किं पुनर्बहुनोक्तेन सर्वधर्मोज्झिताः कलौ
नक्षत्रक्षात्रगोत्रगणकगदगुणाज्ञानिनो वैश्यवेश्यावश्याकर्णांतर्षा गजहयखरगोपण्यपिण्याकभक्ष्याः हीना हीनेषु दीक्षाक्षपितधनधियो दी
क्षिता लुब्धचित्ता भक्ष्याचोहीनचित्ताः कलिमलजनुषो अद्विजास्ते द्विजापि ३३ सीदत्काशीदमरववेदपदार्थबोधवाधाद्युदायश्च अतर्कसुकर्कशास्त्र
नानाभक्तानुगतीप्रभवो रुगर्वास्वर्गार्गलादिकुपथाः प्रभवंति तिष्ये ३४ स्वस्थदास्यं दवाकोत्पथकथनधियः कंदसाः छन्नपापा दुरच्छा
स्वच्छा इवेच्छाहृद्दुदरभरणाः छिन्नपर्णैकपण्याः पिण्याकेऽप्यर्थयंतो भुवि कलिजनराश्छत्रसंछन्नदेहाश्छायासक्ता निवासितो द्विजगणो छिंधीति वा
दे रताः ३५ कृत्याकृत्यविवर्जिताः कलिनराः सुप्ताद्दिवार्ताभिज्ञाताः व्रात्या सत्यविवर्जिताः प्रमितरहे वात्सा इवा भ्रामकाः गर्हंतः सततं धनव्रतपरं निर्गत्यो
हाद्दुहिमत्ताहीनाश्च भृत्याः भुवि कलिजमलासक्तमनसो शिवे ते ३६ कलिमित्रानिरपत्रपानरये असिपत्रेषु विदग्धसर्वगात्राः गतपुत्रकलत्र
मित्रखेदैरभिभूताश्च त्रिनेत्रभाववर्ज्याः ३७ कलिजाः कलजाति वर्णधर्मैर्द्विजकर्म स्वपिनाहीने हंपाय अकुलानकुला इवाकुलानहि कर्म
ण्यपराहि वर्णिनः ३८ उन्मत्ता भुवने वसंति कलिजा वित्तार्थिनः केवलं हृतापेन दिवा निशं स्मरशरव्याहृतचित्ता नराः चिंताशोकशतैर्विदग्धमन

सोविप्रावमानोद्धृताः क्षिप्रंतेनरकार्णवेप्रपतिनामज्जंति दुर्वीजजाः ३९ भूपाः कूपनिवासिनोयमगृहेसंवस्थयूपाजवात्पापाः कंपितसर्वगात्रहृदयाः
किंपाकतुल्याः कलौ शंपावेगसमानचारुकशयासंपाततापार्दितास्तेसर्वेनिरपत्रपाममममहालिंगार्चनावर्जिताः ४० रुद्रालंकृततेवेदजालमगजाकांते।
हृन्निश्वासकंविश्वासायनवैभवेत्कलियुगेदुस्तर्ककाम्यरताः सर्गेचापिनिसर्गतःप्रतिभवंसागारयोनिंगताः गर्वैणैवसंदेशिपापनिरतास्तेरासभाभू
सुराः ४१ मलाविलजलोदरीभरक्षयेनिदुःसूकरीवियोनिभवजारजाभविभवंतितिष्यजनाः द्विजा अपिनिजव्रतंखलुसजंतिलिंगार्चनंव्रजंतिन
रकंशिवेनभजतेहिशंभुंजनाः ४२ इतिश्रीशिवरहस्येसदाशिवांशेनवमांशेशिवगौरीसंवादेकलिवर्णननामदशमोध्यायः १० श्रीदेव्युवाच
हाहाशंभोमहादेवश्रुतोहिकलिविस्तरः कृतत्रेतद्वापरेपित्वयिभक्तिःसुदुर्लभा १ अजाप्रायप्रजानांवैकलिजानांमहेश्वर द्विजानांवाहुजानांचस्त्री
शूद्राणांविशेषतः २ कलिजानांविशेषेणनिस्तारंवित्तराद्वद श्रीस्कंदउवाच इत्थंदेव्यास्तदाष्टष्टोस्मयमानःस्मरांतकः प्राहदेवींतदाविप्रमहाकैला
ससौधगः ३ ईश्वरउवाच माभैषीर्देविभद्रंतेभिषग्वर्योस्म्यहंशिवे कलावपिभवेद्भक्तिःकेषांचित्पुण्यगौरवैः ४ तेभावैःपूजयंत्येवभवोद्भवमतंद्रिताः
तेनरंस्येवदेवेशिकलावपिभवार्णवं ५ देवाश्चमुनयश्चैवमनुष्यास्थावराण्यपि कृतत्रेतद्वापरेषुतपःक्लिष्टाःसदांबिके ६ स्मरंतिस्मकलौजन्मवांछं
तेवहिनाद्भुतं कलेर्गुणान्प्रवक्ष्यामियदिस्यान्मयिभक्तिमान् ७ साभक्तिर्दुर्लभादेविब्रह्मादीनामपिध्रुवं प्रसादादेवसाभक्तिःममसर्वेयुगेष्वपिविशेषतः
कलियुगेभवित्रीत्वाचिदेवहि जन्महंत्रीपुण्यदात्रीप्रदात्रीसर्वकर्मणां ९ फलंमोक्षंचभुक्तिंचराज्यंपुत्रान्स्त्रियोधनं पशवोधान्यनिचयमायुरारोग्यमेव
च १० कलेर्गुणान्प्रवक्ष्यामिश्रृणुत्वंसावधानतः शिष्टानिष्टकरेपिसन्प्रतिकलेरेकोविशिष्टोगुणःकृताकृत्यगुणागुणेषुसुमहाहृष्टिःभवित्रीकलौ
नैवान्येषुयुगेषुतत्त्रिगुणितंध्यानार्चनावाजपोभूयात्सत्यमिदंविशिष्टइतितंजानाम्यहंतंयुगं ११ एकंनंदामिनिंदाशतमपिकुधियांविप्रदुष्टंदेषमंद
ज्ञानानंदमहोददातिसुकलिःनाम्नैवमेसर्वदा किंवक्ष्याम्यपगकल्पकेकलियुगेयोवाक्षरार्धंमुहुःमन्नामामृतपानपीनसुमनाःश्रीमुक्तिकांतापतिः
१२ कलिकल्मषगुणोयसाधुरेवायमीशेक्षणामपिममपूजाध्याननाम्निकनिष्ठः सहिकृतयुगत्रेतद्वापरेवासहस्राण्ययुततपसमृध्यातन्फलंनोलभेत
१३ क्वचित्कलिभवानराभुविभवेत्तभाग्योदयेःशिवार्चनपरायणाःप्रथितभस्मसंधारणाः सएवशरणायवैकलिजनेषुसंतारणाःशिवेससुखकारणोवहुल
पापसंहारणाः १४ सत्यंसत्यंभवानिक्षणमपिकरुणाराशिवाराशिकन्यापतिनयनपदाब्जध्यानधारानुरक्तः कलिमलकलशैलाकारपापेषुसत्कोप्य

यद्यदि शिवभक्तः सत्यमेवेह मुक्तः १५ अलं कलियुगे विके सकलतीर्थसंसेवनैरलं मखमुखक्रियासकलदानविश्राणनैः अलं विविधभूसुराश्रम
विचारसंवर्तनैरलं च सुखसत्क्रियाव्रतभवादिकार्यैरपि किं १६ नालं किं शशिशेखरांबुजपदध्यानेकमोदं मनः मल्लिंगार्चनयापितोजमदिनोनामैवना
लं किमु कालांतकपूजनोत्सवमनिंद्यायस्तु शंद्य कलिः संसारांबुधितारकारणामुमे भक्तिः परामे कलौ १७ शिवे सुकृतसाधनं कलियुगेषु लिंगार्चनं
वदंति निगमाः सदा सुगमनमार्गसंदर्शनं अघौघवलतर्जनं कलिमलादि संतर्जनं भवेत्सुखचोदनं अखिलदुःखसंदीपनं १८ कलावपि तपोवले
रमितपुण्यजालोदयैर्भवंति भुवि तेन एहरमहेशपारादराः न एव खलु विस्तरं भवमहाब्धिजं दुस्तरं तरंति विषयोर्मिमज्जननाशदुःखमहत् १९ सुरा
अपि मुनीश्वराः कृतयुगादिषूद्यताः तपः परमदुष्करं चिरफलं च कालेन तत् अयं कलिरहो शिवे क्षणिकचित्तसंवेशनात्पदांबुजयुगे मम प्रसभमुक्तिला
भप्रदः कलावपि सुरा नरा जननना शमव्याहतं विनिंद्यमभितो विके अभिवदंति वांछंत्यपि कदा खलु भवेत्स्थिनो जननमेव नित्यं सदा सदाशिवपदार्चनेनतदि
ह जन्मनः सत्फलं २१ यः कश्चित्प्रभवेत्तवैव कलियुगे मल्लिंगपूजादरो भस्मोद्धूलितपुंड्रफालतिलको रुद्राक्षकोटीरकः श्रीरुद्रप्रवरोऽपि देवि सुमहापंचा
क्षरावृत्तिभाक् एवं योनियनो वसेत्स समुनिः तस्यैव मुक्तिः स्थिरा २२ धीरः तिष्ठेकधुष्यत्कुपथजनिजरारोगनाशैकनश्यल्लोकः पुत्रकलत्रमित्रजठरीप्रष्यन्कि
लैवं शिवे तत्रैवं यदि चंद्रचूडचरणध्याने क्षणं वा मनः कृत्वा मन्मुक्तांतं तथा कलिकृतामार्तिं न विंदेन्नरः २३ कृतेत्रेतायां वै यदि खलु तथा द्वापरे भवे स
ह स्त्रं वा सह्यात् अनुकर्षणमात्रात्फलगणं शिवे लिंगार्चायांतदिह दिनकैवैक कलियुगे क्षणं त्र्यक्षध्यानात्प्रभवति सुमुक्तेः प्रियतमः २४ सिकतं मां देवं नदि
भवसिकतासु च यजन रजसं मल्लिंगे क्षणमपि च सक्षीणकुपथः उमे धन्यो मान्यो भवति कलिजन्यपि तमसि अहो मन्ये मुक्तः सहि परममान्यप्रियतमः
त्रियायुषमनुप्रभाभसितभूषपूतांगको विशेषितकलुषोच्चयो भवति भाग्यपूर्णः कलौ अशेषसुरसंसदः खलु यानि पूषप्रभाविमानवरमास्थितः स्थिरच
रादिपापापहः २६ मृद्भिर्मल्लिंगसमर्चनेन कलौ नरा निष्कृतिदुष्कृतानि तान्येव पुण्यानि भवंति सद्यो भवोद्भवाचाबलतो भवानि २७ दर्भाग्रतो ग्र
जनिमोत्तमपूजकश्चेद्दुर्भैर्न जातु स भवेत्कलिदुर्भगोऽपि दुर्गाणि संतरति मार्गमुमे विमुक्तेः स्वर्गस्य वा मम कृपावशतो लभेत २८ आशीविषोपमवि
षविषयानुधावच्चित्तेषशेषहृदयो भिन्नकालतिष्य भूषाविशेषकृतशेषमहोरुहारपूर्वाश्म मीषदपि चिंतयते स धन्यः २९ इति श्रीशिवरहस्ये सदा
शिवाख्ये नवमांशे कलियुगवर्णनंनाम एकादशोऽध्यायः ११ श्रीस्कंद उवाच साश्चर्यं सा नदी श्रुत्वा गुणान्कलियुगस्य वै प्रणम्य देवि विनयात्कालका

लंकृपाकरं १ कैलासशिखरे सौधस्थं प्रांजलिः प्राह शंकरं देव्युवाच देवदेव महादेव जगत्स्थित्यंतपालक स्वमूर्तिभिर्ब्रह्मविष्णुरुद्रैंद्रैः शशिशे
खर २ सोमधाम कलामौले गंगाधर महेश्वर पृच्छामि त्वां महादेव किंचित्प्रश्नं मनोहरं ३ वक्तुमर्हसि भूतेश पशुपाशविनाशक कल्पांते चा महादेव
कथं प्रलयकारणं ४ किमाहारा नराश्चैव किमाचारविहारकाः भवंति वै युगांते नैवराकाः शोकमानसाः ५ तन्मे वद महादेव विस्तरेण च शंकर स्कंद उवाच
इति पृष्टो महादेवो जगदाद्जगतां पतिः विश्वाधिकः प्रसन्नास्यो महेशो भक्तवत्सलः ६ उवाच च कलेरंते प्रजानां वर्त्तनं मुने प्रलये लक्षणं चैव कल्केः प्रादुर्भवं
मुने ७ तत्तेहं संप्रवक्ष्यामि यथा देव्यै महेश्वरः प्रोक्तवानद्भुततरं शृणु त्वं सावधानतः ८ सहैवं भिर्मुनिभिर्मुख्यैश्च सुरगणैश्च सत्तमैः शिवप्रोक्तं समासेन व
त्सांते प्रलयं तथा ९ श्रीशिव उवाच लीलां लोके तु लोके कलिभवसुमहापापनाशे लकन्ये मल्लिंगालयभेदकाः प्रतिकलौ विप्रसंहारादराः तद्दारकुसु
मायुधोत्तमशरासारैश्च भिन्नांगकान् तातेषु प्रसभं रमंति नरके तानेव संपातये १० प्रतिकलि नरनार्यो जारजा घोररूपाः कामारातिपदाब्जभक्तिरहिताः संत
प्तचक्रांगकाः मृत्स्नालाभसितत्रिपुंड्ररहिता रुद्राक्षमालोज्झिताः लिंगार्चासु पराङ्मुखा किल शिवे कल्पांतमेताः प्रजाः ११ कल्पांते रुजनृपतिप्रभवो
रुपीडासंक्षुब्धं लोकमखिलं धनधाममहीनं दाराकुमारमपहाय गृहादिकं ते भ्रांता भ्रमंति सकलासु दिशासु गौरी १२ क्षुद्राः क्षोद्ररसालताललिकुचाहा
रा हरद्रोहिणो नैकालानलतापतप्तहृदयाः पापैः शुचा व्याकुलाः कालस्यारुगनागतिप्रशिथिलं आलोपमानानने भेकाभोगइवाविशंति नितरां कल्पांतिमेताः
प्रजाः १३ मद्भस्मांगानुषंगस्थितिरतिविमुखा लिंगसंगोज्झितांगा रुद्राक्षाधृतिरीशनामकलनैः संकीलिताः स्युः प्रजाः मत्पंचाक्षररुद्रसूक्तकलनेम
त्स्तोत्रव्रासारमाभूभाराः कलिकालदुर्जनजनावंती निपापालयाः १४ मद्दालयपरिभ्रमद्द्रविणदीपनैलापहाः मदुत्सवविरोधिनो मम सुभक्तनिंदापराः
पतंतिशलभाइवानलसुदीप्तते लिंविकेकलोकलुषवृषयोनरकवासकोलाहलाः १५ काषायाश्रयिणाश्रमेषु निरता विप्रद्रुहो वाक्कृशठा लिंगाकाश्रकृप
कृतन्नवपुषेश्रोतद्विषस्ते कलौ पापास्ते श्रमणा भवंति बहवः श्रुत्युक्तमंत्रादराः ते दूरात्परिहारकाश्च नरका घोरा हरद्रोहिणः १६ निस्संयाचकपाचकान्नति
रताः संकोचवार्त्तोज्झितानिर्मुच्याखिलपुण्यपापजनितं चिंचारसान्नादराः तिष्येपुष्पपरिभ्रमन्मधुकरभ्रांतासेवंते भिक्षवः कक्षासक्तदुरन्नपेटकधरा वेदां
तवार्त्तोज्झिताः १७ वर्णी स्वर्णानुरक्तो भवति यतिवरः वन्यवासी च ग्राम्यो नाकश्चिन्मम पूजनोद्यतमतिः कामादिमात्रादरः अश्लेषूद्यतचित्तवृत्तिरस
कृद्द्यूते च पाने तथा स्त्रैणा निर्घृणचेतसः कलिभवा वर्त्तंति ते संघशः १८ स्वस्थायः स गृहस्थ एव गृहिणीपाकादरो योवटुः शिश्रूषुः सपदुः क्षरीरकपट्या

पारमात्रोत्सवः भूस्युत्कर्षेसुकर्षणश्रमपराश्रांताश्रमोक्तक्रियाक्रांताएवंकलौभवंतिवहवोनिर्द्रम्भोगोत्सवाः १९ शक्रेप्याक्रोशयुक्ताभुविकलिजनराःशु
क्लवर्णचत्तर्कविक्रेतारक्रियाणांगुडकरणनकृत्याकर्मनि नैवानुक्रोशयुक्ताभरवरवहनाभूसुराएसभाभाहालेयावालवृत्याप्रतिकलिजनिताभक्तभुंत्त्येकभावाः२०
उन्निद्रारुणपद्मसद्मजनितानंदेननेनिर्हताभूपाद्यैरपघातेःद्विजसुरनिवहंमर्दयंत्येवघोरं निर्द्रव्यादिशिनेमृगाद्रवमहाव्याधोरुवाणाहताःप्राणानप्यसमीक्ष्य
हंतकुधियोधावंत्यजासंघवत् २१ हाहाघोषानुभूषामखमुखरहिताद्रोहिणोघोररूपानानाकारविकारकेशजटिलानिःसारभूतानराः दुर्दांतद्रुहिणेनताहत
धियोदुःखाम्बुधौनिर्गताः कालापारविलासकीलितकलावर्तेप्रपश्यांविके २२ निर्मर्यादार्यहीनेसततकलुषीतस्वांतएयासवृत्याबुध्याभिधायसोरखंकलिकु
लिशहतानिर्दयंमर्दयंति रुद्राक्षामलभूतिदेहमसकृत्कद्रुद्रपूजापरंश्रीरुद्रार्थविचारकंजडधियःपंचाक्षरेसादरं २३ प्रारब्धारब्धलब्धैरूपनतजनुभिः
कर्मभिःश्राम्यमाणाभ्रांताविश्रांतिहीनाःश्रमविविधद्वेषैःदुःखसैरभ्रैकयुक्ताः नानादेहेष्ववस्थात्रितयतनुभृताभूभरास्तेमवस्थाःस्वस्थाइत्येवतेषामनिरपिगिरि
जेतेकलौवर्त्तयंति २४ रासभविकसेरुशोफधाराजनितास्तेकलिनारीयोनिजाएःकुसुमेष्वशरवधूतसारावरकोकोदरस्हारपादद्रूः २५ अंगावंगकलिंगतुंगज
महाराष्ट्रेषुसौराष्ट्रकेवंगंगादिविदर्भनार्मदमहाकालेतथाकोंकणे भृंगारादिषुचीनसालसुमहागंगाप्रयागादिषुम्लेच्छाएववसंतिसंततकुरुक्षेत्रेतथापुष्करे २६
आर्यावर्तानुवृत्तिःक्वचिदपिनभवेदार्यकाणांकलौवैकांचीकोसलचेरचोलजमहापांड्येषुद्विजानांस्थितिः सह्याद्रिप्रभवोरुतीरजमहालिंगोत्तमांगेक्षणक्षी
णप्रायअसह्यभूतककलौस्थानंवरंवैसतां २७ पर्णादाअपिसंविशंतिमुनयःश्रीताम्रपर्णीतटवर्णाद्याश्रमतत्पराःशिवमुमेपर्णापतिंसंश्रिताःवाततु
ब्धाब्धिजातप्रबलदुरुमहावीचिचाचलिताशाऔर्वस्योर्ध्वशिखाभितापितमहामेघोदयानोघना २८ वर्षंत्युद्यतविद्युदार्भटरवैःप्रातःप्रदग्धावनौकुर्वंतोप्य
दिवासदेवतिमिरंलोकेनुलोकोज्झितं मत्यादाचौविमुखहृदयोभारभूपोभुवौसौतिष्ठपुष्येपिमध्याह्नेनभुविसरिदिस्नानहीनोतिहीनः २९ डिंभःकुंभीश
